Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४५९५

Title आपस्तम्ब शुल्ब सूत्र टीका.
शुल्ब प्रदीपिका

Author श्री करविन्द स्वामी

Extent ५० Age ८

Subject सूत्र पद्धति परिशिष्टं

शुल्बसूत्रटीका शुल्बप्रदीपिका

४५१५

4515

36 double

F. 51

कुंडादिलक्षण

॥आधाने यदि कः प्रोक्तः सौमिको द्विपदो भवेत्॥ चयने त्रिपदं कुर्यात्पञ्चकं संयाज्ञिको बुधः॥
॥इति यज्ञपार्श्वः॥

ग्रं १८००

॥श्रीगणेशायनमः॥अविघ्नमस्तु॥ॐमित्येकाक्षराख्येयंवंदेवाङ्मनसोन्नति ।पशुपतिस्वरयोयद्धितद्विलोः परमंपदं।लक्ष्मी
सहायमतसीकुसुमच्छविशोभते।ज्योतिर्महृदयेस्थयागंतस्महाराजीवलोचनं।आपस्तंबायमुनयेनमोवेदार्थभूमये।सूत्रवक्त्रा
न्निषेवतेयज्ञाकृतिकुमारिकाः।तस्यसूत्रस्यसुव्याख्येयमत्रार्थावबोधनी।करविंदाधियेनाभिधीयतेभाष्यकृन्मते।यज्ञव्या
ख्यांप्रतिज्ञांकुर्वताभगवतापस्तंबेनव्याख्यायतयाहविर्यज्ञाःसोमयज्ञाःपाकयज्ञाश्चप्रतिज्ञाताः।व्याख्याताश्च।तत्रतावदैष्टि
कसौमिकपाशुबंधिकदर्विहोमिकाःसमविषममध्यतुर्मंडलचतुरश्रव्यश्रनानाश्रयोगार्हपत्यायतनप्रभृतिचित्येष्टकापर्य
न्तानियतपरिमाणदेशविशेषास्तत्रतत्रोक्तातेविमातव्याइतितद्विमानंप्रतिसाधनभूतरज्ज्वादीनांसाधनभूतस्यैतावती वए६
शुरेतावत्त्वेवस्यकरणीतिस्वरूपमात्रेणज्ञातुमशक्यत्वात्तत्प्रतिपादनमवश्यंकर्तव्यमिति।यज्ञव्याख्यानानंतरंविहार
योगव्याख्याक्रियते।विहारयोगान्व्याख्यास्यामः।विहारोविहरणंयोगस्तत्साधनं।विहाराणांयोगाविहारयोगास्तान्वक्ष्यामः
न्व्याख्यास्यामः।प्रतिपादयिष्यामः।विपूर्वोहरतिःक्रीडाप्रज्वलनवेधनसंचरणविमानाद्यनेकार्थः।तत्क्रियाविशेषसंबंधा
द्देवदेशादिषुतत्रतत्रार्थेविहारव्यपदेशः।अत्रतुविमानवाची।युजिश्चद्विविधः।समाधिवाचीसंबंधवाचीच।अत्रतुसमाधिवाची।
दिवादिः।समग्व्यवस्थानेसमाधिः।ससमाधिरित्यत्रव ------------ स्वते।युज्यतेएभिरितियोगाः।विहारणे राम
पायभूतारज्ज्वादयः।दृष्टांतयोरित्यादिनाविमातव्यस्यवेद्यादित्वेनस्वरूपेणसानोविविधसंपादनावच्छेदोविहरणंतत्साधन १

मृतारज्ज्वाद्योर्विहारयोगाभ्यां व्याख्यास्यामः। व्याख्यानं नाम सति संदेहे बलवता हेतुनोपपादनं विहरणं। यथासमचउ
रम्रमनुपपद्यत्वाद्धहस्यमानार्थेषु यायाकामीशब्दार्थस्य विशयित्वाद्दित्येवमादिकं। ननु कुतो विहारस्याभावश्चाचित्वेकु
तो वातस्य विद्यमानपर्यायत्वं कुतो वा विहरणस्य वेद्यादिसंबंधः। कुतो वा तत्र रज्ज्वादीकरणत्वं कुतो वा युजेः समाधिवचन
ता। कथं वा रज्ज्वादीनां समाधिसाधनत्वं किमर्थो वा रज्ज्वादिषु योगव्यवहारः। उच्यते। वितर्के विहरणं व्याख्याते विहरणमि
ति भावप्रत्ययनिर्देशाद्भाववचनो विहारशब्दः। तदेकरज्ज्वा विहरणे रज्ज्वा भाविमायेति रज्जुकार्ये विमानविहरणयोर्दर्शना
दुभयोः पर्यायत्वं। एतावेति ज्ञेयानि वेदिविहरणानि भवंति ज्ञेयानि वेदिविहरणानि भवंतीत्यनेन विहारस्य वेद्यादिसंबंधः।
प्रागंतुवचतुर्थमायामप्याहृत्य यारज्जुः प्रमाणमात्रीरज्जुमिति तत्र तत्र करणेषु रज्जुव्यपदेशवशात्प्रार्थमानीतिर्यज्मानीत्रि
करणीत्यष्टद्राकरणीति तत्र तत्र स्त्रीलिंगनिर्देशाद्रज्जेति तृतीयाकृते वा रज्ज्वनो विहरणे साधनत्वं प्रस्य हेतोरेतत्कर्मसुल
मित्याचक्षते। श्रावार्यएतं प्रयराशिंससमाक्षिरयाप्रोयोगस्तिवद्धातिति नञ्जायुतेयुजेः समाधिवचनता। युजेरर्थस्य स
माधेर्विहरणसाध्यत्वाद्विहरणसाधनान्यपि योगसाधनानि भवंतीति रज्ज्वादयो योगास्तूच्यंते। विहारयोगपरतो ज्ञापयि
तुं विहरणसाधनेषु रज्ज्वादिषु योगव्यवहारः। योगग्रहणे किमर्थं साधनत्वप्रतिपत्त्यर्थमित्युक्तमेव। तर्हि नवक्तव्यं। दर्शपूर्ण
मासौ व्याख्यास्यामस्त्यादिषु प्रतिज्ञानंतरे साधनान्येव व्याख्येयतयावगम्यंते। एवं तर्हि योगग्रहणं मानसाधनेषु प्राधान्य

ख्यापनार्थो।किंतत्प्राधान्यं।यद्यप्यन्यानिपदद्वेषणादीनिमानसाधनानिसंतितथापितैर्विमानेबहुप्रयत्नसाध्यासम्यग्वेद्या
दिहैत्रसमाधिसिद्धिः।रज्जुसीरादिभिर्विमानेसासिद्धिरीषत्करीत्यतस्तत्ररज्ज्वादीनांप्राधान्यं।नतुरज्ज्वादीनां।विहारसाधन
त्वंलोकतोपिसेत्स्यति।किमर्थमिदमुच्यतेविहारयोगाद्व्याख्यास्यामइति।उच्यते।सत्यंसेत्स्यतितथापिकालवद्देशस्यापि
गत्वाउक्तप्रमाणस्यमात्रयापिन्यूनाधिकभावेसतिअंगवैगुण्यंस्यादितिमन्यमानआचार्योरज्ज्वादीनामसंदिग्धमीष
2 त्करमुपायभावंस्वयमेवप्रतिपादयितुमिदंब्रूते।यतोन्यूनाधिकभावेयत्नेनपरिहरणीयेसतिप्रमादादसामर्थ्याद्वायदिभे
दउपजायतेतत्रावश्यंप्रायश्चित्तंकर्त्तव्यमित्येवमर्थमिदमुच्यतेविहारयोगाद्व्याख्यास्यामइति।अथविह्रीयतइतिविहारा
इतिव्युत्पत्त्यावेद्यादयोदेशविशेषाविहाराः।योगाश्चतत्संपादनोपायभूताश्चएवरज्ज्वादयः।अत्रकेचिन्नियतदिक्संयोगानां
वेद्यादीनामज्ञातदिग्विशेषैर्विहरणंकर्तुमशक्यमितिदिग्विशेषज्ञापनार्थमादावेवदिशांग्रहणंकुर्वंति।यथाहभगवा
कात्यायनः।समेशंकुंनिखायशंकुसंमितयारज्ज्वामंडलंपरिलिख्ययत्रलेखयोःशंक्वग्रच्छायानिपततितत्रशंकूनिहंति
साप्राचीतत्रशंकुंनिखायतदंतरंरज्ज्वाभ्यस्यपाशौकृत्वाशंक्वोःपाशौप्रतिमुच्यलक्षणेनदक्षिणापायम्यमध्येशंकुरेवमुत्तर
तःसोदीचीति।अस्यार्थः।अथयत्रक्वचोद्देशेदेवयजनंकरिष्यन्भवतितंदेशंजलेनसमीकृत्यतन्मध्येशंकुंनिहत्यशंकु राम
संमितामेकतःपाशांरज्जुंकृत्वाशंकौप्रतिमुच्यतयामंडलंपरिलिख्यमंडललेखायांपूर्वाह्णेयत्रशंक्वग्रच्छायानिपततित २

त्र बिंदुं कुर्यात्। अपराह्णे च यत्र लेखायां सा निपतति तत्र बिंदुं कुर्यात्। तौ पूर्वापरबिंदू सा प्राची दिक्। बिंद्वोर्द्वयोः शंकू निखाय तदंत
रद्विगुणां रज्जुमुभयतः पाशां कृत्वा मध्ये लक्षणं कृत्वा शंक्वोः पाशौ प्रतिमुच्य लक्षणेन दक्षिणापायम्य लक्षणे शंकुं कुर्यात्। एव
मुत्तरतोपि लक्षणेनापायम्य शंकुं कुर्यात्। तौ शंकू दक्षिणोत्तरौ सोदीची दिगिति। तथा ज्योतिर्ज्ञानेरष्टमंडलमध्यस्थशंकुछाया
प्रवृत्तयाः योगाभ्यां कृतमत्स्येन ज्ञेये याम्योत्तरे दिशे इति। एवमन्यैरपि बहुप्रकारैर्दिशां ग्रहणं तत्र तत्रोक्तमिति। प्रसिद्धत्वाद्दिग
वार्येणेह नोक्तं। मीयतेनेनेति व्युत्पत्त्या पार्श्वमान्यादीनि प्रमाणानि तेषि सिद्धे प्रमाणे परिभाष्यते॥ यावदायाममेव प्रमाणं॥ यावद्ब
द्धः प्रमाणवाची। आयामशब्दो विस्तारप्रतियोगिवचनः। यावदवधारण इति समासः। यावानायामस्तावत्प्रमाणं भवति। किम
त्रावधार्यते। आयामपरिमाणमेव प्रमाणमिति। तत्रायामस्य द्विगुणत्वात्तदाश्रयभूतरज्ज्वादि प्रमाणमिति। अस्य प्रमाणेति
र्यगित्यादिषु प्रयोजनं। इदानीं तावद्वैष्टिकसौमिकपशुबंधिकानां प्रायेण दीर्घचतुरश्रत्वात्तदनुरूपं विहरणमुच्यते॥ तद्दीर्घम
भ्यस्यापरस्मिन् तृतीये षड्भागोने लक्षणं करोति पृष्ठ्यांतयोरंतौ नियम्य लक्षणेन दक्षिणापायम्य निमित्तं करोत्येवमुत्तरतः।
प्रमाणमित्येवं तच्छब्देनायामभूतं प्रमाणं परामृश्यते। तस्यार्धं तद्दर्धमभ्यसनं उपरिक्षेपः। अपरस्मिन्पश्चाद्भाविन्यागतो तृ
तीये प्रमाणार्धाभ्यासेन तृतीये षड्भागोने षष्ठो भागः षड्भागः तेन भागेन हीने तस्मिन्नेव तृतीये लक्षणं लक्ष्यते येन तल्लक्ष
णं। विमातव्यक्षेत्रस्य कोटिपरिज्ञानोपयभूतं निरंछनं करोति। कुर्यात्। पृष्ठ्यांतयोः। विमातव्यक्षेत्रस्य मध्ये पृष्ठ्यां कृत्वा तदधिगम्य

स्यैता। तत्र च ययेवेष श्रोण्यंसपार्श्वव्यपदेशात्। यया श्रोण्यंसपार्श्वानां मध्यं दृष्टं एवमिदमपीति तत्र भवालेखा एष्या। तदंतयोः शंकु
निखाय रज्ज्वंतौ पाशौ कृत्वा तयोर्नियम्य प्रतिमुच्य लक्षणेन निरंछनेन दक्षिणापायम्य दक्षिणतो विकृष्य रज्जुं तत्र निमित्ते तत्र को
टिज्ञानहेतुं शंकुं कुर्यात्। एवमुत्तरतः। उत्तरतोऽपि विकृष्य रज्जुं निमित्ते कुर्यात्। विपर्यस्येतरतः। विपर्यासो रज्ज्वंतयोः पूर्वपाशं
पश्चिमे शंकौ पश्चिमं च पूर्वस्मिन् कृत्वा इतरतः कृतनिमित्तात्स्वदेशादन्यत्र तत्र च दक्षिणत उत्तरतश्च विकृष्य निमित्ते कुर्यात्। एतदु
क्तं भवति। आयामार्धप्रमाणे प्रतिथप्रतिपं षोढा विभज्य तस्मिंनंतरादारभ्य पंचसु भागेषु अतीतेषु लक्षणं कर्षणार्थं वलवस्त्रंमंर
ज्वादि बध्वा। साभ्यासस्य प्रमाणस्यांतौ पाशौ कृत्वा पृष्ठ्यांतयोः शंकुनिखायतयोः प्रतिमुच्य लक्षणेन दक्षिणापायम्य शंकुं कु
3 र्यात्। उत्तरतोऽप्येवमेव विकृष्य शंकुं कुर्यात्। रज्ज्वंतौ विपर्यस्येतरस्मिन्नपि प्रदेशे शंकुद्वयं कुर्यादिति। ननु अपरग्रहणं पूर्वतृतीये
लक्षणव्याहत्यर्थं किं न स्यात्। तत्रापि तस्याश्च विरोधादेव न स्यात् हि मध्यतृतीये व्यावत्य पूर्वापरयोः प्रदर्शनार्थं भविष्यतीति चेत्
नैतत्। यद्येवमिष्टमभविष्यत्तर्हि स्पष्टतरममध्यतृतीयस्त्येवावक्षत्। न चासौ तत्र योक्तवान्। अथ मन्यसे तदर्धमभ्यस्यापरस्मि
न्नित्युक्ते अभ्यासादन्यत्समाणमपरं प्रतीयते। सामर्थ्यान्नतृतीये लक्षणं भवतीति। नैतदपि युक्तं। यदयमागंतायामाभ्यासः श्रो
त्तवपवस्याहणया रज्जुशेषतां वक्ष्यति। माहावेदिमाने षड्त्रिंशिकायामष्टादशोपसमसस्यत्वादौ। पंचदशिके नैवापायम्य श्रोण्यंसा राम
नां विहरणं वक्ष्यतीति तेनात्राभ्यासागंतुरेवापरः। तत्र षड्भागेन निरंछनमिति ज्ञायते। ननु यद्यागंतुः परोऽपरशब्दस्तर्हि षड्भागो २

नेलक्षणमित्येतावदेवालं किमर्थस्तृतीयशब्दो नैवास्य प्रयोजनं पश्यामः। उच्यते। अस्त्येवास्य प्रयोजनं किंचित्। अत्रोच्यमानविह
रणस्य सर्वाभ्यासविषयत्वख्यापनार्थो। तत्कथं। अत्र तावदाचार्येण सर्वज्ञेन सर्वानुग्रहकारिणा प्रयुक्तस्याक्षरावयवस्यापि नान
र्थकता युक्ता। किं पुनः पदस्य। अतो मुख्यया वृत्त्या यदि प्रयोजनेनोपलभामहे ततो गौण्या लक्षणया वा वृत्त्या। यथा शब्दोर्थवान्स्या
त्तथा व्याख्येयः। अत एवा[illegible]र्थवशाद् एवं व्याख्यायते। भागं तु समानाधिकरणभूततृतीयशब्दस्यावयवभूतत्वात्त्रिशब्दवाच्य
न त्रित्वेन साभ्यासस्य प्रमाणस्य भागं तु परिमिताया यावन्तो भागाः संभवन्ति तावतां भागानां संख्याः लक्ष्यन्ते। तथा षड्भागशब्दाव
यवभूतषट्शब्दवाच्येन षट्त्वेन तदनुरूपतया त्रित्वलक्षितसंख्या द्विगुणीभूता भागसंख्याः लक्ष्यन्ते। तेनायमर्थः संपद्यते। सर्वेषु
अभ्यासेषु साभ्यासस्य प्रमाणस्य भागं तु परिमिताया यावन्तो भागाः संपद्यन्ते तावद्द्विगुणं भागं भागं तु कृत्वा तस्मिन्भागेनैकेन ही
नेन लक्षणकरणमिति। तद्यथा। अर्धाभ्यासे तावदर्धमेको भागः प्रमाणं तु तत्तुल्यौ द्वौ भागौ। अतः साभ्यासस्य प्रमाणस्य भागं तु
तुल्यास्त्रयो भागाः। भागं तेन द्विगुणछेदे तस्य षड्भागाः तत्र भागेनैकेन हीनेन लक्षणं। तया माभ्यासे आयाम एको भागः। प्रमाणं
वत्तत्सदृश एको भागः। तेन साभ्यासस्य प्रमाणस्य द्वौ भागौ तद्द्विगुणछेदे अभ्यासे चत्वारो भागाः। तत्र चतुर्भागोनेन लक्षणं। तथा तृ
तीयाभ्यासे अभ्यास एको भागः प्रमाणं तत्तुल्यास्त्रयो भागास्तद्द्विगुणछेदे अभ्यासेष्टौ भागाः। तत्राष्टभागोनेन लक्षणं। एवमेव तुरी
याद्यभ्यासेषु प्रमाणस्याभ्यासवशेनैव भागकल्पनं। भागं तेन द्विगुणसंख्यया भागकल्पने भागोनेन लक्षणे च द्रष्टव्यं। नतु

यत्राभ्यासेभ्यासतुल्यताप्रमाणस्यन [illegible] भवतिकथंतत्रप्रमाणेचागतेचभागकल्पनं।
यथाऽधिकाभ्यासेछेदनंन्यूनाभ्यासेचाउच्यते।तत्राप्ययमेवप्रकारः।किंतुसाभ्यासप्रमाणे।अंशेनचसदृशछेदंकृत्वागंतुम
पितछेदेसंख्यातद्विगुणेसंख्ययाछेदंकृत्वातत्रयावद्भिरंशैर्हीनेकोभागोहीनोभवति।तावद्भिरंशैर्न्यूनेभ्यासेनिरंछनंकुर्यात।अधि
काभ्यासेनाद्विगुणाभ्यासेभ्यासएकोभागःप्रमाणेभागार्धंतत्रार्धेनचसदृशछेदेसाभ्यासप्रमाणेत्रयोर्धछेदाः।तत्संख्याद्विगु
णछेदेभ्यासेतत्रषडर्धछेदाः।तेषुद्वाभ्यांहीनाभ्यासेकोभागोहीयतइतितद्दूनेनलक्षणेस्यात।त्रिगुणाभ्यासेभ्यासएकोभागःप्रमा
५ णेतुतृतीयांशकः।तत्सदृशात्रयस्तृतीयांशास्तेनसाभ्यासस्यप्रमाणस्यचत्वारस्तृतीयांशाः।तद्विगुणछेदेऽष्टागतेताअष्टौतृतीयां
शाः।तत्रत्रिभिरंशैर्न्यूनेलक्षणं।एवंचतुर्गुणाभ्यासेषुभागानुनीयतदनुरूपमागतेलक्षणेकुर्यात।तथात्रिपदाभ्यासेभ्यासएको
भागःप्रमाणेतत्सदृशएकोभागस्तृतीयांशश्च।अंशेनचसदृशछेदाभ्यासप्रमाणेसप्ततृतीयांशाः।तद्विगुणछेदेऽष्टागतेतोचतुर्दश
तृतीयांशाः।तेष्विभिर्न्यूनेतत्रलक्षणे।एवमेवान्येष्वपिसांशछेदेषुभागकल्पनंलक्षणेवद्रष्टव्यं।एतदपिनविस्मर्तव्यं।सर्वेष्वभ्यासे
ष्वागतेभागैक्यंतद्दशेनप्रमाणेभागैक्यंभागानेकत्वंसांशत्वंकेवलांशागतत्वंचेति।एवमस्यविहरणस्यसर्वाभ्यासविषयत्वमव
गंतव्यं।यद्येवमुपपद्येतकृतएतज्ज्ञायते।यन्न्यायोऽङ्गीकृतस्त्यलमतिप्रसंगेन।प्रकृतमनुसरामः।लक्षणकरणेकिमर्थंनिरं राम
छनार्थं।तिर्यङ्मान्यहणयारज्जुविवेकार्थंवाद्दक्षिणोत्तरयहणेकिमर्थंप्रदर्शनार्थंतिरश्च्याः।स्तनरथ्यासदःप्रभृतिषुविरोधात।अ ४

स१ स्यविहरणस्यान्यस्यप्रतिपादिनायाह।समाधिः।द्विपदमिदं।तच्छब्देनविहरणमुच्यते।समाध्यभिप्रायःपुलिंगनिर्देशः।समम्य
क्ःसम्यगर्थे।समशब्दार्थेवा।आङ्समंततोभावंदधातिःकरोत्यर्थेसम्यगन्यूनातिरिक्तत्वेनसमंतादापादयतीतिसमाधिः।य
द्वासमानानामाधिःसमाधिः।पार्श्वमान्योतिर्यङ्मान्योश्चरज्ज्वायारज्जुद्वयपरस्परमन्योन्यंसमाःसंपादयतीतिचतुर्दिक्षुसमंक्षे
त्रमापादयतीतिवासमाधिः।अयमर्थः।विमीयमानक्षेत्रस्यान्यूनातिरेकत्वेनावस्थानंसमाधानं।तच्चसम्यगुपायस्यविहरण
स्यफलंतद्धेतुत्वाद्विहरणस्यहेतुफलयोरभेदोपचारेणतदेवविहरणंसमाधिरित्युच्यते।योगइतिचेतिकिमर्थमिदमुच्यते।श्रो
तॄणांप्रश्नन्निरोचनार्थंयदेतदुक्तंविहरणेसमसमाधिः।समीचःश्रोण्यंसान्संपादयति।तस्मादिदंसूत्रमं।सूत्रतोनिःसंदेह
मनेनविहर्तव्यमिति।तन्निमित्तोनिर्ह्रासोविवृद्धिर्वा।तदितिसमाधिहेतुर्विहरणमुच्यते।निमित्तंकारणंहेतुरितिपर्यायः।नि
र्ह्रासोपचयःविवृद्धिरूपचयःतन्निमित्तोस्यात्।लाघवार्थमिदमुच्यते।महतिचतुरश्रेविहृतेतदेकदेशभूतेचतुरश्रेसंपादयि
तुमिच्छन्महतश्चतुरश्रस्यश्रोण्यंसादिसंस्थितशंक्वनुरूपमभिमतप्रदेशेषुशंकून्निहत्यशंकुषुरज्जुःप्रसार्ययावदभिम
तंप्रसार्यताभिरल्पंचतुरश्रंसंपादयेत्।विवृद्धौचतुरश्रगणश्चमानादिभिर्यावदभिमतदीर्घरज्जुःप्रपद्येतावत्कोटिसंस्थितशं
क्वनुरूपाःप्रसार्याभिमतप्रदेशेषुशंकून्निहत्यतदंतरेवृद्धीयात्।एष्वायांकरणीषुवाभिमतप्रदेशेषुशंकून्निहत्यतदनुरूपा
णिनिमित्तांतराणिकृत्वारज्जूःप्रसार्यक्षेत्रस्यापचयमुपचयंवाकुर्यादित्यर्थः।निर्ह्रासोदाहरणंमहावेद्यामुत्तरवेदिधिष्ण्यादयः

।विहृधकदाहरणं।महावेद्यादयः।अस्यैवविहरणस्यविषयव्याप्तिदर्शनायाभ्यासांतरमाह॥आयामंवाभ्यस्यागंतुचतुर्थमायाम
स्याक्ष्णयारज्जुस्तिर्यङ्मानीशेषोव्याख्यातंविहरणे॥आयामंप्रमाणेकृत्स्नांअभ्यस्यकिमर्थंतत्कर्तव्यं।पूर्वोक्तप्रमाणेनलक्षणादि
कुर्यादित्यभिप्रायः।अयमर्थः।आयाममभ्यस्यापरस्मिन्द्वितीयेचतुर्भागेनेललक्षणंकुर्यादिति।एवंकृतेसतिआगंतुचतुर्थमा
५ गंतेनैवचतुर्थप्रतीक्षायामस्याक्ष्णयारज्जुस्यात्।अक्ष्णयेतिनिपातोविभक्तिप्रतिरूपकः।कोणादिग्वाची।कोणगतारज्जुर
क्ष्णयारज्जुःकर्णरज्जुरित्यर्थः।शेषः।अक्ष्णयारज्जुभूतप्रतीकादन्यानित्रीणिप्रतीकानितिर्यङ्मानी।तीर्यङ्मीयतेअनयेति
घ६ तिर्यङ्मानीतिर्यगवस्थितारज्जुःरज्ज्वभिप्रायस्त्रिलिंगनिर्देशः।वाशब्दोभ्यासांतरसमुच्चयार्थः।आयामंवाद्विगुणंवात्रिगुणं
वातृतीयंवातुरीयंवात्येवमाभ्यासविशेषार्थंवाग्रहणं।अयमर्थः।यावतीरज्जुःप्रमाणेतस्मात्कृतादधिकात्समागम्य
स्यते।तत्रतत्रपूर्वोक्तप्रकारेणतावतःस्नावतोवर्गीकृत्वाभागेनैकेनहीनेनलक्षणंकृत्वाष्टध्यातयोरंतोनिपत्यत्यादिनाप्रकारे
णविहरेदिति।एषामुदाहरणानिउत्तरसूत्रेदर्शयिष्यते।नतुलक्षणनिमित्तार्थरज्ज्वामायतायांलक्षणपूर्वभाविनःप्रमाणा
दनेतरस्यैकस्यभागस्यप्रमाणस्याक्ष्णयारज्जुताभागांतराणीतिर्यङ्मानितानितावत्स्पष्टेव।किमर्थमिदमुच्यते।आगंतुचतुर्थ
मायामस्याक्ष्णयारज्जुःस्तिर्यङ्मानीशेषइति।उच्यते।प्रथमसूत्रेअर्धाभ्यासेषड्भागेनेललक्षणमित्येतावन्मात्रमभिहितं।एता राम
वतासएकोभागःकिमर्थःकिमभ्यासमूलतोहीयतेउत्तरतः।अन्येचभागाःकिमर्थाःनिवृत्तइतिनज्ञायते।तत्रनियमंहे ५

तोरभावात्प्रवृत्तिरनियमो वा स्यात्। इहागंतुचतुर्थमायामध्यान्हणयारज्जुर्निर्यग्भानीशेष इति। अतः स एको भागोभ्याससमूलतः
स्तरे भागाः स्वरं तत्र स्तीह सिद्धं। तत्रोपजीवितं न तत्र सिद्धं। न त्वेकस्य भागस्याह्नणयारज्जुत्वे भागांतराणां तिर्यग्भानित्वं च प्रथम
भूताभ्यास एव वक्रत्वे। कस्मात्तद्विपरीतं कृतं। उच्यते। अर्धाभ्यासायामाभ्यासयोरेकैके विहरणस्य विषयज्ञायते। तृतीयश्रुतिसा
मर्थ्यात्सूचितमभ्यासन्यायविषये च स्वत्रावयवैर्दर्शयितुं विपरीतं कृतं। किंचात्राभ्यासस्य षोडाभागे चतुर्थविभागे च एकस्य
भागस्याह्नणयारज्जुता भागांतराणां सर्वेषां तिर्यग्भानिता च प्रतिपाद्यते। व्याख्यातं विहरणमिति। अत्र व्याख्यातमेव वि
हरणं। नान्यद्विहरणमिति। अयमर्थः। आगंतोर्न्यूनाधिकभावेन साभ्यासस्य प्रमाणस्य आगंतो भागानामनेकविधत्वेपि
पूर्वोक्तमेव विहरणं नातोन्यद्विहरणमिति॥ तत्र श्लोकाः। भागाः साभ्याससमानस्य यावंतोभ्याससंमिताः। द्विघ्नावेतस्वआ
गंतोतदेकोनेत्रलक्षणं। तिर्यक्साभ्याससमानस्य सीशाः स्युः साशसंख्याया॥ द्विधा द्विहरणयागंतुर्भागोनेत्रापिलक्षणा॥ उन्ने
धिकेवाप्यागंतो कथं साभ्याससमानके। भागानां परिच्छित्तिः स्यात्कैंगस्यान्निरंच्छनं। समतोन्यूनताधिक्ये यागंतोस्यान्तदेकता॥
तदंशेन प्रमाणस्य भागेक्यानेकतांशता। आगंतावधिके मानं केवलांशो भवेत्सदा। न्यूने भागैक्यनानात्वे स्यातांसोशा च केव
ले। त्रिपादोने तु सांशत्वमर्धोने स्यान्निरंशता। समे भागैक्यमेव स्याद्वितीयभागकल्पना। सांशे संसदृशं छेदं कृत्वाभ्याससमान
कां तच्छेदसंख्याद्विगुणच्छेदमागंतुमध्यगा। यावद्भिरंशैर्न्यूनेत्र भागे नैकं न हीयते। तावद्भिरंशैर्न्यूनः स्यादागंतोर्लक्षणाक्रियायावतांश

पं ४

स्तं
रणाभ्यासोयेनभागेनहीयते।लक्षणार्थसमच्छेभागस्थंद्विसावद्भागस्वरणे।तृतीययहणंकुर्वन्नुषड्भागसहितंमुनिः।साभ्यासमा
नाभागोद्विरभ्यासे मन्यते।साभ्यासस्यप्रमाणस्यत्रेधाकरणपूर्वकं।अभ्यासस्यतृतीयत्वमुक्त्वाषड्भागिनंतुतं।अंगीकृत्यतुत
त्रेकभागोनेलक्षणंव्यधात्।यदुक्तेतेनसाभ्याससमानभागस्थसंख्यया।मिंद्याद्विगुणयागंतुभागोनेस्यान्निरंछनं।अनंतरं
6 त्रिसंख्यायांषट्संख्यावृत्तास्तुनासाभ्याससमानभागीयासंख्यागंतोद्विरिष्यते।तृतीयषड्भागोक्तेद्वेयतः।साभ्यासगोचरे।
साभ्याससमानादभ्यासेद्विगुणच्छेदमाहतु।यद्वैकसंख्यासंयुक्तमानभागस्थसंख्यया।द्विगुणीकृतयागस्यादागंतोभागक
ल्पना।यद्वाभ्यासार्धसदृशभागेसाभ्याससमानकं।कृत्वातसंख्ययागंतुंकृत्वैकोनेत्रिलक्षणे।तृतीयशब्दसामर्थ्यादयंन्यायउद
र्यते।पंचदशिकाष्टिकयोरित्यादेरुक्तिरेवच।पंचदशिकाष्टिकयोरितियत्सम्यमानकं।यद्वादशिकपंचत्रिंशिकयोरितिवापरे
।त्रिगुणागंतुतत्सर्वेत्र्यंशाभ्यासमथापिवितं।अयुक्तंपंचमाभ्यासेयद्वापंचगुणीवितं।एतेविहरणानार्थायामाभ्यासस्यगोचरे।
यतस्तेनभवेतांतेअभ्यासेन्यायहेतुके।अर्धाभ्यासेतथायामाभ्यासेयत्तुपरस्परं।सापेक्षांगविधिस्तद्वन्न्यायस्तस्यनिबंधनं।
नानाभूतेपिचागंतोतद्भागेचतथाविधे।निरंछनविधिस्तस्माद्भागेनैकेनवर्धिते।अर्धाभ्यासेतुभागोनेलक्षणंयद्वितीयके।स
हरीकृत्यवायामाभ्यासेतत्फलभाविनः।तिर्यक्आनयनयारज्जुविवेकस्यैकभागकं।आश्रित्यनिर्णयंकृतेतेनैकोनेत्रलक्ष राम
णं।अलमतिविस्तरेण।एतद्विहरणेद्वित्रसमाधानात्समाधिरित्युक्तं।अस्यसमाधिरेतुत्वंदर्शयन्नाह।दीर्घस्यानयनयारज्जुःपार्श्व ६

मानीतिर्यङ्मानीचयत्स्वयम्भूतेकुरुतस्तदुभयंकरोतीतिनाभिर्ज्ञेयाभिरुक्तंविहरणं।दीर्घस्यदीर्घचतुरश्रस्यसमस्येतिसाम
र्थ्याद्युच्यते।तत्रैवंव्याख्यास्यते।अक्ष्णयारज्जुस्तिर्यङ्मानीचोक्ता।पार्श्वययामीयतेसापार्श्वमानी।यत्पृथग्भूतेनानाभूते
कुरुतः।संपादयतः।तदुभयंउभयक्षेत्रपरिमितंक्षेत्रंकरोति।संपादयतीत्यर्थः।दीर्घचतुरश्रस्यपार्श्वमानीस्वयमेवपार्श्वमा
नीतिर्यङ्मानीचभूत्वायत्क्षेत्रंकरोति।तिर्यङ्मानीचस्वयमेवपार्श्वमानीतिर्यङ्मानीचभूत्वायत्क्षेत्रंकरोति।अक्ष्णयारज्जुर
पिस्वयमेवपार्श्वमानीतिर्यङ्मानीचभूत्वातदुभयक्षेत्रपरिमितंक्षेत्रंकरोति।नाभिर्ज्ञेयाभिरुक्तंविहरणं।यावंभूताःपार्श्वमा १५
नीतिर्यङ्मान्यक्ष्णयारज्ज्वस्ताभिर्ज्ञेयाभिर्ज्ञातुंशक्याभिरुक्तप्रकारपार्श्वमानीतिर्यङ्मान्यक्ष्णयारज्जुनामन्यतरयोःप
रिमाणज्ञानेनान्यतरज्ञातुंशक्यमितिएवमेताज्ञेयाः।तत्कथं।यदाद्यत्करणीपार्श्वमानीद्यत्करणीतिर्यङ्मानीतिज्ञा
यते।अक्ष्णयारज्जुस्तदुभयक्षेत्रकरणीतिज्ञायते।एवंद्यत्करणीपार्श्वमानी।द्यत्करण्यक्ष्णयारज्जुरितिज्ञायते।अक्ष्णयार
ज्जुफलभूतक्षेत्रात्पार्श्वमानीफलभूतक्षेत्रेशोधितेशिष्टक्षेत्रस्यकरणीतिर्यङ्मानीतिज्ञायते।यदियत्करणीतिर्यङ्मानीद्य
त्करण्यक्ष्णयारज्जुरितिज्ञायते।अक्ष्णयारज्जुफलभूतात्क्षेत्रात्तिर्यङ्मानीफलभूतक्षेत्रेशोधितेशिष्टस्यकरणीपार्श्वमानी
तिज्ञातुंशक्यते।एवमेताज्ञेयाः।नाभिर्ज्ञेयाभिरुक्तंविहरणं।यदुक्तंविहरणंतत्राभिर्ज्ञेयाभिर्नाज्ञेयाभिरित्यर्थः।एवमुत्तरस्य
विहरणस्यसमाधिहेतुत्वमवगंतव्यमित्यभिप्रायः।अथवाज्ञेयाभिर्मनसिकर्तुंतुल्ययितुमुचिताभिः।पूर्वोक्तंविहरणंकर्तव्यं।

अयमर्थः।एणर्थमानीतिर्यञ्चानलक्षणयारज्जुनांप्रमाणंज्ञात्वातिर्यञ्चानलक्षणयारज्जूभयप्रमाणमेकारज्जुमानीयतिर्यञ्चानं
तेलक्षणांकृत्वानयापूर्वोक्तंविहरणंकर्त्तव्यमिति।पूर्वोक्तानामर्धाभ्यासादीनांकानिचिदुदाहरणान्यत्रोच्यंते।अर्धाभ्यासेयथा।
द्वादशांगुलेप्रमाणेषडंगुलेभ्यस्तेतद्दष्टादशांगुलं।तत्रागंतुनाषडंगुलेनप्रमाणेपरिच्छिन्नेसाभ्यासस्यषडंगुलत्रयोभागाः।त
त्रभागसंख्याभिस्त्रिभिस्ताभिस्त्रिष्टभिर्द्विगुणाभिःषड्भिर्भागैतोषडंगुलेछिन्नेतस्यैकोभागःएकमंगुलं।तत्रषड्भागेनेलक्षणे
कृतेभागेनैकेनसहितआयामस्त्रयोदशांगुलंस्पलक्षणयारज्जुःशिष्टाःपंचभागाःपंचांगुलानिभिस्तिर्यञ्चानी।तत्रद्वादशांगुले
प्रमाणंचतुरश्राणिचतुश्चत्वारिंशच्छतमंगुलिक्षेत्राणिकरोति।पंचांगुलातिर्यञ्चानीपंचविंशतिमंगुलीक्षेत्राणिकरोति।त
थात्रयोदशांगुलालक्षणयारज्जुःतदुभयमेकोनसप्ततिशतमंगुलिक्षेत्राणिकरोति।आयामस्याभ्यासेयथा।आयामोद्वादशांगु
मे५ लःआगंतुश्चतावानेवसाभ्यासस्यप्रमाणस्यागंतुपरिमितौद्वौभागौतद्द्विगुणसंख्ययाआगंतोच्छिन्नेत्र्यंगुलाश्चत्वारआगंतोभा
गाःतत्रागंतुचतुर्थमायामस्थालक्षणयारज्जुःपंचदशांगुलाशेषास्तिर्यञ्चानीनवांगुला।तत्रनवांगुलेकाशीतिमंगुलीक्षेत्राणिक
रोति।आयामःपूर्ववदेव।पंचदशांगुलातदुभयंपंचविंशत्यधिकंशतद्वयंमंगुलिक्षेत्राणिकरोति।आयामद्विगुणाभ्यासेयथा।
आयामःसएवतद्द्विगुणश्चतुर्विंशत्यंगुलःतत्राभ्यासेनप्रमाणेपरिच्छिद्यमानेअभ्यासएकोभागःप्रमाणंतदर्धं।अर्धेनैक राम
स्मिन्परिच्छिद्यमानेत्रीण्यर्धानितद्द्विगुणच्छेदः।तत्रैकैकमर्धंचतुरंगुलंद्वेअर्धेअष्टांगुलमेकोभागः।तदूनेलक्षणेतेनयुक्तेप्र ७

माणंविंशत्यंगुलमक्ष्णयारज्जुः।तद्धीनश्चागंतौचतुरंगुलमर्धचतुष्टयंषोडशांगुलंसातिर्यङ्मानी।तत्रषोडशांगुलाषट्पंचाश
त्कृतेद्वयमंगुलिद्विशताणिकरोति।आयामोद्वादशांगुलः।चतुश्चत्वारिंशत्कृतेतदुभयंचत्वारिंशतानिविंशत्यंगुलाक्ष्णयारःकरोति।
यद्वाभ्यासएकोभागःप्रमाणेतदर्धा।एकस्मिन्भागेद्विगुणेद्वेसंख्ये।अर्धेद्विगुणितेद्वेअर्धेतत्रैकासंख्यास्त्रिसंख्यया।आगंतौचतुर्विंश
त्यंगुलेतस्यैकोभागोष्टांगुलः।तेनैकेनसहितंप्रमाणेविंशत्यंगुलाक्ष्णयारज्जुरित्यादिपूर्वोक्तमेव।तृतीयाभ्यासेयथाप्रमाणेचतु
र्विंशत्यंगुलेतस्यतृतीयमष्टांगुलं।तस्मिंश्चतुर्विंशत्यंगुलेप्रक्षिप्तेसाभ्यासंप्रमाणेद्वात्रिंशदंगुलं।तत्रसाभ्यासस्यप्रमाणस्या
गंतुसमाश्चत्वारोभागाः।तद्द्विगुणच्छेदश्चागंतुरष्टभागाः।तत्रैकोभागएकांगुलं।तत्रभागेनैकेनसहितंप्रमाणेपंचविंशत्यं
गुलमक्ष्णयारज्जुः।सप्तांगुलातिर्यङ्मानी।सैकोनपंचाशत्करोति।चतुर्विंशत्यंगुलेप्रमाणंषट्सप्ततिपंशतानिचकरोति।तदु व६
भयंपंचविंशत्यंगुलापंचविंशतिषट्शतानिचकरोति।एवमेवाभ्यासांतरेष्वपिद्रष्टव्यं।त्रिकचतुष्कयोरित्यादिना।कानिचिदुदा
हरणानि।उत्तरत्रस्वयमेववक्ष्यति।अलमतिप्रसंगेन।ननु।चतुरश्रस्येतिकथंलभ्यते।तत्करणीभूतपार्श्वमान्यातिर्यङ्मान्याच
दर्शनात्समस्येतिकथं।कृतइतिद्विवचननिर्देशात्अक्ष्णयारज्जुरित्येकवचननिर्देशाच्च।कृतइतिद्विवचननिर्देशेसतिएकप्र
कारापार्श्वमानीतिर्यङ्मानीतिज्ञायते।तथाक्ष्णयारज्जुरित्येकवचननिर्देशात्साप्येकप्रकारेतिज्ञायते।विषमोपिदीर्घचतुरश्रो
वियतएव।यस्याक्ष्णयारज्जुःअन्योन्यसमवेतःसनिवर्ततेसासमस्येतिलक्षणं।पृथक्पृथग्ग्रहणंकिमर्थं।पार्श्वमानीतिर्यङ्मान्योः

संसर्गनिवृत्त्यर्थं भूतग्रहणं किमर्थं । पृथक्त्वग्रहणस्य संसर्गविशेषेण निवृत्त्यर्थं । दीर्घचतुरश्रस्याक्ष्णयारज्जुरिति यत्करोतीत्युक्ते
समस्य साक्षि यत्करोतीत्यत आह ॥ चतुरश्रस्याक्ष्णयारज्जुर्द्विस्तावतीं भूमिं करोति । समचतुरश्रस्याक्ष्णयारज्जुर्द्विस्तावतीं द्वि
गुणी यस्या भूमेः स्यमक्ष्णयारज्जुः तावद्द्विगुणां भूमिं करोति । द्विगुणायाः करणी भवतीत्यर्थः । द्विस्तावतीमयूरव्यंसकादित्वात्
समासः । न त्वक्ष्णयारज्जुरित्येकवचननिर्देशात् समचतुरश्रात्तु यदपरत्वात् द्वन्द्वस्येति न्यायाद्द्वितीयापि तादृशस्यैव विज्ञाय
ते । समस्यैयं न विषमस्येति । अतः किमर्थं समस्य शब्दः उच्यते । एवं तर्हि मिश्रणार्थः समस्य शब्दः । विश्वतोयं समस्य मिश्रीकृते
रू ६ कीकृत्येत्यर्थः । समस्य चतुरश्रस्याक्ष्णयारज्जुर्द्विस्तावतीं भूमिं युगपदेकीकृत्य करोतीति तत्रार्थो वा समस्य शब्दः । ननु पूर्व
सूत्र एव दीर्घशब्दमपहाय चतुरश्रस्येत्युक्तं तेनास्यापि सिद्धिर्भवत्येव । सत्यं । तया सत्युक्ते न न्यायेन समस्यैव तत्स्यात् । न दीर्घ
8 स्य तस्मात्पृथगेवमेव वक्तव्यं । प्रकृतोपजीवनेन संज्ञां विधातुमाह ॥ समस्य द्विकरणी ॥ समस्य चतुरश्रस्याक्ष्णयारज्जुः सा द्विकर
णी संज्ञा भवति अन्वर्थैषा संज्ञा । द्वयोः करणी द्विकरणी ॥ ननु । पूर्वसूत्रेणैव द्विकरणीत्वे सिद्धे अयुक्ता संज्ञा । सत्यं । द्विकरणीत्वे वि
हितयापि दीर्घत्रिकोणादीनामपि द्विकरण्यः स्युरिति । तत्र द्विकरणीत्युक्ते अस्या एव ग्रहणं यथा स्यादित्येवमर्था संज्ञा । ननु । सा द्वि
करणीत्येव वक्तव्यं समस्य ग्रहणं किमर्थं । वक्ष्यमाणापि संज्ञा समद्विकरणीविषया यथा स्यादिति समग्रहणस्य पूर्वसूत्रविषय राम ८
त्वमत्र सामर्थ्यात् ॥ द्विकरण्या एव प्रकारांतमाह ॥ प्रमाणं तृतीयेन वर्धयेत्तच्चतुर्थेनात्मचतुस्त्रिंशोनेन सविशेषः । समचतुरश्रस

प्रमाणमायामं तत्तृतीयेन स्वतृतीयेन वर्धयेत् तद्द्विगमयेत्। तत्स्वतृतीयचतुर्थेन स्वतृतीयचतुर्थेन। तृतीयस्य चतुर्थभागेनेत्यर्थः
आत्मचतुस्त्रिंशेनेना आत्मशष्ठेन चतुर्थस्यात्मा परामृश्यते। वर्धयेदित्येव। स विशेषः। तस्य विशेष इति संज्ञा। तृतीयादीनां द्वं
प्रमाणे येन स विशेषसंज्ञा। यथा। द्वादशांगुलं प्रमाणं चतुरंगुलेन वर्धयेत् चतुरंगुलमेकांगुलेन तिलोनेन वर्धयेत्। चतुस्त्रिंश
तिलाः पृथुसंश्लिष्टाः अंगुलिरिति प्रमाणे विदो मन्यंते। वक्ष्यति। अर्थे तद्विशेषमन्यस्य बाह्यविशेषाभ्यां परिशिष्टाद्धीयारित्यादि
ति। कथमध्यमे सविशेषं प्रतिमुच्य चतुर्थेन चतुर्थसविशेषेणेत्येवमादि। अत्र सह विशेषेण वर्तत इति विशेषसहितं प्रमाण
मेव सविशेष इत्यवगंतव्यं। किमर्थं महती संज्ञा। स्वार्थैषा यथा स्यादिति। तत्कथं विपूर्वः शेषरतिशयवाची। शेषस्य सर्वेपादाने
विपूर्वो ह्यतिशयस्तदुपदेशात्। अहणायाभूतद्विकरणा प्रमाणादतिरिक्तादेशात् किंचिद्विशिष्यते। अतिरिच्यत इति विशेष
यद्वा। ततः किंचित्तेन विशेषयति अतिरेचयति मानकाल इति गा विशेषः। तथाहि। चतुस्त्रिंशत्तिला अंगुलिरित्युक्तो। द्वादशांगु
लस्य तिलवर्गः। एकं नियुतं षडयुतानि षट्सहस्राणि चत्वारि शतानि षष्टिः चत्वारि तिलप्रमाणानि चतुरस्रक्षेत्रप्रमाणानि
तिलोनसप्तदशांगुलस्य तिलवर्गः। त्रीणि नियुतानि त्रीण्ययुतानि द्वे सहस्रे नव शतानि विंशतिर्नव च तिलप्रमाणानि चतुर
स्रक्षेत्राणि। अत्रैकं तिलं चतुरस्रक्षेत्रद्विगुणादतिरिच्यते ततस्तस्य विशेष इति संज्ञा। विगुणना। सविशेषेणामीयमाने यो प्रमीय
मानेनात्मनियतत्क्षेत्रमतिरिच्यते तेनीवारस्तकमात्रमपि सर्वथा अतिरिक्तं न भवति तन्न्यूनेन तेनाल्पतरमिति द्विगुणी। येन

विशेषव्यवहारः। इदानीं प्रासंगिकमेकं विहरणं व्याख्याय विहरणान्तरमाह। अथापरं प्रमाणं मात्री रज्जुस्तु भयतः पाशां करोति मध्ये
लक्षणमर्धमध्ययोश्च षष्ठ्यायां रज्जुमायम्य पाशयोर्लक्षणे षिति शंकू निहन्तु पान्त्ययोः पाशौ प्रतिमुच्य मध्येन लक्षणेन दक्षिणा
पायम्य निमित्तं करोति मध्यमे पाशौ प्रतिमुच्योपर्युपरि निमित्तं मध्यमेन लक्षणेन दक्षिणापायम्य शंकौ निहन्ति तस्मिन्पाशौ
प्रतिमुच्य पूर्वस्मिन्नितरं मध्यमेन लक्षणेन दक्षिणमंसमायच्छेदुन्मुच्य पूर्वस्मात्परस्मिन्प्रतिमुच्य मध्यमेनैव लक्षणेन दक्षिणं
श्रोणिमायच्छेदेवमुत्तरौ श्रोण्यंसौ। अथापरं विहरणं व्याख्यास्याम इति शेषः। प्रमाणमात्री मायाममात्री रज्जुस्तु भयतः पाशां
पंचशंकु विहरणं। यथा आयतयोः पाशस्तु कोमध्ये लक्षणं निरंछनार्थं। अर्धमध्ययोः पूर्वार्धमध्ये अपरार्धमध्ये च लक्षणद्वयं च कृत्वा
षष्ठ्यायामात्यभूमिमध्यलेखायां रज्जुमायम्य प्रसार्य पाशयोर्लक्षणेषु च पंच शंकून्निहन्ति। इति शब्दस्यार्थो। उपान्त्ययोः अंत्यस
मीपस्थितयोः शंक्वोः पाशौ प्रतिमुच्य मध्यमेन निरंछनकृतेन दक्षिणापायम्य निमित्तं चिह्नं करोति। निमित्तं दिक्संदर्शनार्थं
मध्यमे शंकौ पाशौ प्रतिमुच्योपर्युपरि निमित्तं तस्योपरिष्टाद्दासं नतरं दक्षिणापायम्य रज्जोरन्ते शंकुं निखाय मध्यमाच्छंक्वोः पा
शावुन्मुच्य दक्षिणाशंकावेकं पाशं प्रतिमुच्य पंचानां पूर्वस्मिञ्छंकावितरं पाशं प्रतिमुच्य निरंछनेन दक्षिणमंसं प्रत्यायच्छेत् रज्जुं
यथा दक्षिणांसः संपद्यते तथायच्छेत्। एवमेव दक्षिणां श्रोणिमायच्छेत्। इत्येवमादिषून्मुच्य पूर्वस्मादित्यादीनि उत्तराणि सूत्राणि। राम
पंचशंकुरयं योगः समचतुरश्रस्य विषयः। खंडः प्रथमः। अथापरो योगः षष्ठ्यां तयोर्मध्ये दश शंकून्निहत्यार्धेन तद्विशेषमभ्यस्य ल ९

त्राणीकृत्वार्धमागमयेदंत्ययोःपाशौकृत्वामध्येसविशेषंप्रतिमुच्यपूर्वस्मिन्नितरंलक्षणेनदक्षिणमंसमायच्छेदुन्मुच्यपूर्वस्मादपर
स्मिन्प्रतिमुच्यलक्षणेनैवदक्षिणश्रोणिमायच्छेदेवमुत्तरौश्रोण्यंसौ।प्रमाणमात्रीरज्जुमित्येवविहरणोपायोयोगसूत्रेकं।प्रष्ठ्या
न्तयोर्मध्येचशंकुंनिहत्य।व्याख्यातमेतत्।अर्धप्रमाणमात्ररज्ज्वाअर्धेनतद्विशेषमभ्यस्यसंयोज्यलक्षणंकृत्वासूत्रेसविशेषार्धान्ते
अर्धमागमयेत्।शिष्टंयथाप्रमाणेभवतितथागमयेत्।अयमर्थः।अर्धद्विकरणीमात्रीकेवलार्धमात्रीचैकांरज्जुंमीत्वाअर्ध
द्विकरणीमात्रेलक्षणंकृत्वारज्ज्वंतौपाशौकृत्वामध्यमेशंकौसविशेषमर्धंप्रतिमुच्य।पूर्वस्मिंश्छंकौकेवलमर्धंप्रतिमुच्य।लक्ष
णेनदक्षिणमंसमायच्छेत्कुर्यात्।उन्मुच्यपूर्वस्मादितिस्पष्टार्थं।अयमपियोगःसमचतुरश्रविषयएव।अर्धेनतद्विशेषमि
तिप्रमाणसविशेषयोःप्रसक्तत्वान्नत्रसंयोगेनोच्यते।प्रमाणंतिर्यद्विकरण्यायामस्तस्याक्ष्णयारज्जुस्त्रिकरणी।प्रमाणद्विकर
ण्यक्ष्णयारज्जवःउक्ताः।यस्यचतुरश्रस्यप्रमाणंतिर्यङ्मानीद्विकरणी।पार्श्वमानीतस्यचतुरश्रस्याक्ष्णयारज्जुःप्रमाणपार्श्व
मानीतिर्यङ्मानीसैत्रस्यत्रिकरणीभवति।तृतीयकरणेनैतेनव्याख्याता।त्रिकरणीव्याख्यानेनतृतीयकरणीव्याख्याताकथं।तृ
तीयंतर्यक्द्विकरण्यायामःतस्याक्ष्णयारज्जुस्तृतीयकरणी।तृतीयकरणेनवर्गमायाह।विभागस्तुनवधातृतीयकरणेनवर्ग
मेरयीस्तुविशेषःक्षेत्रस्यनवधाविभागःकार्यः।कस्यक्षेत्रस्य।प्रमाणक्षेत्रस्यत्रिकरणीक्षेत्रस्यवा।अयमर्थः।यस्यक्षेत्रस्यतृतीय
करणीसाध्यतेतत्क्षेत्रंनवधाविभज्यतत्रैकस्यभागस्यपार्श्वमानीतिर्यङ्मानींकृत्वातस्यैवभागस्याक्ष्णयारज्जुंपार्श्वमानींकृ

त्वाताभ्यांचतुरश्रेकृतेतस्याक्ष्णयारज्जुमादायतयाचतुरश्रेकृतेतत्क्षेत्रंप्रमाणपार्श्वमानीतिर्यङ्मानीकृतक्षेत्रस्यतृतीयंभ
वति।यद्वात्रिकरण्याकृतेचतुरश्रेनवधाविभक्तेतत्रैकस्यभागस्यकरणीप्रमाणचतुरश्रक्षेत्रस्यतृतीयकरणीभवति।सचवि
भागःप्रमाणक्षेत्रतृतीयमितिप्रदर्शनं।एतेनचतुष्करणीचतुर्थकरणीप्रभृतीनामपि।तथाहिप्रमाणेतिर्यङ्त्रिकरण्याया
मः।तस्याक्ष्णयारज्जुःचतुष्करणी।तथाप्रमाणेतिर्यक्चतुष्करण्यायामःतस्याक्ष्णयारज्जुःपंचकरणी।तथाप्रमाणेतिर्यङ्
पंचकरण्यायामःतस्याक्ष्णयारज्जुःषट्करणीत्यादिद्रष्टव्यं।तथाहि।द्विकरणीतिर्यङ्मानीत्रिकरण्यायामःतस्याक्ष्णयारज्जुः
पचकरणी।पंचकरणीतिर्यङ्मानीदशकरण्यायामस्तस्याक्ष्णयारज्जुःपंचदशकरणीत्याद्यपिद्रष्टव्यं।तथातुरीयंतिर्यङ्त्रि
करिण्यायामस्तस्याक्ष्णयारज्जुस्तुरीयाकरणी।तथापंचमंतिर्यक्चतुष्करण्यायामस्तस्याक्ष्णयारज्जुःपंचमकरणीत्यादिद्र
ष्टव्यं।त्रिकरणीतृतीयकरण्योःसौत्रामण्यादिषुप्रयोगः।ननुदीर्घस्याक्ष्णयारज्जुरित्यनेनत्रिकरणीतृतीयकरणीप्रभृतयःक
रण्यःसिद्धाः।तत्किमर्थंत्रिकरण्यादिकरणीविधिरारभ्यते।उच्यते।द्विप्रकाराःकरण्यःशुद्धमूलाअशुद्धमूलाश्चशुद्धमूलेया
सांताःशुद्धमूलाःविपरीताअशुद्धमूलाःद्वाभ्यांचत्वारित्रिभिर्नवेत्यादिवत्प्रमाणाश्चतुष्करणीनवकरणीप्रभृतयःशुद्धमूला
अशुद्धमूलाःपुनर्नैवंकदाचित्फलेनव्यपदेशार्हाःतासांतुसर्वदाद्विकरणीत्रिकरणीत्रिकरणीचतुष्करणीपंचकरणीत्येवंव्य राम
पदेशइतिप्रदर्शयितुमिदमुच्यते।तद्वयोःकरणीद्विकरणी।त्रयाणांकरणीत्रिकरणी।चतुर्णांकरणीचतुष्करणीपंचानांक १०

रणीति। किंचादीर्घस्याक्ष्णयारज्जुरित्यनेनसामान्येनोजसात्रिकरणीप्रभृतीनांमवगतिर्भवति। उक्तप्रकारेणसंपन्नानीक
रणीनांतेनसंगहमात्रंभवति। तदुच्यतएव। द्विकरण्यात्रिकरणीविशेषविध्यारंभः। तुल्ययोश्चतुरश्रयोःरुक्तःसमासःस
मासनोसमीकरणंएकीकरणंतत्करोतीतिसमासः। करणीतुल्यप्रमाणयोःसमासकरणउक्तः। चतुरश्रस्याक्ष्णयारज्जु
र्द्विस्तावतींभूमिंकरोति। समस्येतित्रिकानुभाषणेवक्ष्यमाणार्थं। ह्रस्वंतावदुक्तंह्रस्वमत्रपरिशिष्यते। तद्दिदंवक्ष्यामीति। नानाप्रमा
णयोश्चतुरश्रयोःसमासोक्तसीयसःकरणयावर्षीयसोवृद्ध्रमुल्लिखेदावद्विकोर्वतुरश्रस्याक्ष्णयारज्जुःह्रस्वचतुरश्रस्यतिर्य
ङ्मान्यायत्रनिपततितावत्यातिर्यङ्मान्याचतु[illegible]ह्रस्वस्याक्ष्णयारज्जुरुभसमस्यतितदुक्तं। नानाप्रमाणयोर्भिन्नप्रमाणयोः
चतुरश्रयोःसमासःकरणउच्यते। कसीयसःअल्पीयसः। चतुरश्रस्यकरण्याकरणीप्रमाणेनवर्षीयसः। महतश्चतुरश्रस्यवृद्धंछि
न्नंएकदेशमुल्लिखेत्। वृद्धस्यछिन्नस्याक्ष्णयारज्जुःउभेनानाप्रमाणेचतुरश्रेसमस्यति। एकीकरोति। तदुक्तंभवति। नानाप्रमा
णेचतुरश्रेसमस्यअल्पीयसश्चतुरश्रस्यकरणीप्रमाणेनमहतश्चतुरश्रस्यैकस्यांतिर्यङ्मान्यांपरिछिंद्यात्। ततश्चाम्यकर्ध्वरि
खां। यथापरस्यांतिर्यङ्मान्यां। तावतिप्रदेशेनिपततितयालिखेत्। लिखाविभक्तस्याल्पीयसःकरणीप्रमाणंतिर्यङ्मानीक
स्यमहतःकरणीप्रमाणणार्श्वमानीकस्यदीर्घचतुरश्रस्याक्ष्णयारज्जुरुभेनानाप्रमाणेचतुरश्रेसमस्यतिचतुरश्रइतिवर्त्तमा
नेपुनश्चतुरश्रग्रहणेमडलयोरपिचतुरश्रंकृत्वैवसमासःसंकरणमितिज्ञापयितुं। तदुक्तंदीर्घस्येत्यादिना। अस्योपयोगोविधाभ्या

सारिष्वा।चतुरश्राच्चतुरश्रंनिर्जिहीर्षन्यावन्निर्जिहीर्षेत्तस्यकरण्याहृद्वमुल्लिखेद्वृद्धस्यपार्श्वमानीमक्ष्णयायेतरत्पार्श्वमुपसंह
रेत्सायत्रनिपतेत्तदपच्छिन्द्यानिरस्तं।इदमपिकरणीविधानमेव।महतश्चतुरश्राद्ल्पेचतुरश्रेनिर्जिहीर्षेद्विर्हर्तुमिच्छन्यया
वक्ष्यमाणेचतुरश्रमपनेतुमिच्छति।तस्याल्पस्यकरण्यामहतश्चतुरश्रस्यैकदेशोयथाच्छिन्नंभवतितथोल्लिखेत्।एवंकृतेछिन्ने
निरसितव्यक्षेत्रप्रमाणातिर्यङ्मानीकंमहतक्षेत्रपार्श्वमानी[redacted]प्रमाणपार्श्वमानिकंदीर्घचतुरश्रंभवति।तस्यक्षेत्रस्यएकांपार्श्व
मानीमक्ष्णयेतरत्पार्श्वमुपसंहरेत्।गमयेत्।सापार्श्वमान्यक्ष्णयोपसंहृता।यत्रेतरस्याःपार्श्वमान्याःप्रदेशेनिपतति।तदपच्छि
द्यात्पार्श्वमानीमपच्छिद्याधिकंत्यजेत्।छिन्द्यानिरस्तं।छिन्नापार्श्वमानीनिरसितव्यक्षेत्रस्यकरणीभवति।तयापार्श्वमान्या
चतुरश्रेकृतेनिरसितव्यक्षेत्रंनिरस्तंभवतीत्यर्थः।इमंप्रकारमुदाहरणमुखेनस्पष्टीकर्तुमाह॥उपसंहृताक्ष्णयारज्जुःसर्व
चतुःकरणीछिन्नंचेतराचयत्पश्वभूतेकृत्स्नमुभयंकरोतितिर्यङ्मानीपुरुषःषोडशषट्त्रीःस्पष्टकं।सर्वतोद्विपुरुषप्रमा
णंचतुःपुरुषंचतुरश्रंविषयीकृत्योदाहरति।एकस्यचतुरश्रस्यावयवभूतेदीर्घचतुरश्रेपार्श्वमानीमक्ष्णयोपसंहृतासा
चतुष्करणीचतुःपुरुषकरणीतिप्रतिज्ञाता।अत्रतिर्यङ्मानीद्विपुरुषमानीद्विपुरुषमात्रकरणीति।अस्यदीर्घचतुरश्रस्यछि
न्नापार्श्वमानीतिर्यक्छिन्नकरणीतिनज्ञाता।सेवात्रावगंतव्या।तत्रपुरुषप्रमाणयातिर्यङ्मान्याष्टयग्भूतयायच्छिद्य
तेछिन्नयापार्श्वमान्याष्टयग्भूतयाक्ष्णयारज्जुस्मुभयहेतुकरणीतिन्यायतोवगता।तत्राक्ष्णयारज्जुफलभूताश्चतुःपुरुषा राम ११

श्चतुरश्रादेकप्रमाणं तिर्यङ्मानी फलेत्वेकस्मिन्नपनीते त्रयः पुरुषाः परिशिष्यन्ते छिन्नान्तु पार्श्वमानी तेषां करणीति परिशेषा
त्स्मात्त्रिपुरुषकरणीत्यवगंतव्या। अतरस्युक्तो। तिर्यङ्मानी पुरुषं करोतीति शेषः। छिन्नापार्श्वमानी त्रीन्पुरुषान्पुल्लिंगनिर्देशः।
पुरुषाभिप्रायः। पुरुषनिर्देशश्चानयोः पुरुषेण विमानं पुरुषा [illegible] भ्यासोपचययोः समास
निर्ह्रारयोन्तुदाहरणमित्ययमित्यर्थः। सर्वतो द्विप्रमाणाच्चतुःपुरुषाच्चतुरश्रादेकं पुरुषमपनीय त्रिपुरुषसमचतुरश्रं क
र्तुमिच्छन्नतच्चतुरश्रं पुरुषप्रमाणया रज्ज्वा मध्ये पछिद्य द्विधा कृत्वा तदर्धस्यैकां पार्श्वमानीमपरां पार्श्वमानीं प्रत्यक्षण
योपगमयित्वा तयोर्यत्र संपातः तत्रावस्थितां पार्श्वमानीं स्थित्वा विशिष्टा निरस्य शिष्टया पार्श्वमान्या समचतुरश्रे कृते
चतुरश्रं त्रिपुरुषं चतुरश्रं भवति। तथा। सर्वतश्चतुःपुरुषाच्चतुरश्राच्चतुरः पुरुषानपनीय द्वादशपुरुषं समचतुरश्रं कर्तुमिछ
न्द्विपुरुषं प्रमाणया। तिर्यङ्मान्या समचतुरश्रं विभज्यार्धस्यैकां पार्श्वमानीमन्यां प्रतिगमयित्वा तयोः संनिपातावस्थि
तां पार्श्वमानीमपछिद्य निरस्य शिष्टया पार्श्वमान्या चतुरश्रे कृते तत्क्षेत्रं द्वादशपुरुषसमचतुरश्रं भवति। छिन्नाशिष्टा पा
र्श्वमानी तत्करणी भवतीत्यर्थः। एवं प्रमाणत्वे त्रं तृतीयद्विकेमपनीय तृतीयकरणीत्वेत्रमपनेतुमिछेत्। तृतीयद्विकरणी ह
द्भुलिखेदित्यादि कृते तृतीयकरणी भवति। एवमेवस्य त्रचतुष्करणीचतुर्थकरणीप्रभृतयः करण्योवगंतव्याः। तदुक्तं दी
र्घस्याक्ष्णयारज्जुरित्यनेन अस्योपयोगो द्रोणादिषुदीर्घेषूक्तः। सर्वतःस्वल्पप्रमाणे समचतुरश्रे एकतश्चायामतोधिकादी

दीर्घचतुरश्रं समचतुरश्रं चिकीर्षेत् तिर्यङ्मान्यापछिद्य शेषं विभज्योभयतउपदध्यात् १

12

र्घचतुरश्रंसमचतुरश्रेकर्तव्येतिर्यङ्मान्यातिर्यङ्मानीप्रमाणयारज्ज्वापरिमितेप्रदेशेमध्येदक्षिणोत्तरमपच्छिद्यशेषंपूर्वभागं
मध्येतिर्यक्द्विधाविभज्यतयोःपश्चिमभागेतथैवावस्थाप्यपूर्वभागंप्रथमस्योत्तरतःप्रतीचीनमुपदध्यात्।उत्तरपूर्वभा
गंतिर्यक्द्विधाविभज्यतयापश्चिमंभागंतथैवावस्थाप्यान्यस्तंखंडभागंतुनासंपूर्यसमचतुरश्रंसंपाद्याधिकंभागंतुमन्त्तंख
डंततोनिर्हरेत्निर्गमयेत्।तस्यनिर्हारतकः।चतुरश्राच्चतुरश्रं[redacted]निर्जिहीर्षन्निति।अस्योपयोगोरथचक्रा
दिषु।समचतुरश्रंद्विधाकृत्वातस्यैकस्मिन्भागेभागान्तरस्योपर्युपरिनिहितेदीर्घचतुरश्रंभवतीतिमत्वानस्यप्रका
रमाह।समचतुरश्रंदीर्घचतुरश्रंचिकीर्षन्यावद्विचिकीर्षेत्तावतीपार्श्वमानीकृत्वायदधिकंस्यात्तद्यथायोगमुपदध्या
त्।तिर्यङ्मान्यापच्छिद्यशेषंविभजेदित्येवसमचतुरश्रंदीर्घचतुरश्रंकर्तुमिच्छन्समचतुरश्रत्रिभागद्विभागार्धादीनामन्यतमे
नयेनांशेनपरिमिततिर्यक्प्रमाणंदीर्घचतुरश्रंकर्तुमिच्छति।तावत्यातिर्यङ्मान्यासमचतुरश्रमेकतोपच्छिद्यशेषस्यस
मचतुरश्रकरणीसमीपार्श्वमानीतावतीमुक्त्वायायतिर्यङ्मान्योसमचतुरश्रंकृत्वातत्रशेषंविभज्यतस्यशेषस्ययदधिकं
स्यात्तद्यथायोगमुपदध्यात्।अधिकस्ययथाविभागेकृतेविभागाःएकैकशोवासर्वाःसहत्यवाभागोत्तरस्योपरिविधीय
मानात्तद्विस्तारंव्याप्यान्योन्यानुसंघटितान्दीर्घंसंपादयेदिति।तथाविभज्यसर्वशेषभागोत्तरस्योपरिनिदध्यादिति।अय राम
मर्थः।समचतुरश्रंदीर्घचतुरश्रंचिकीर्षन्क्रियमाणस्यदीर्घस्यचिकीर्षितविस्तारप्रमाणयातिर्यङ्मान्यासमचतुरश्रमेकतो १२

छिद्यशिष्टस्य पार्श्वमानीं तावतीं कृत्वा तदधिकमेकधानेकधा वा विभज्यते। सर्वे भागा दीर्घचतुरश्रं यथा संपादयंति तथा स-
र्वशेषं भागांतरस्योपर्युपरि ध्यात्। अत्र। विकृते शेषशरे कर्म वा चिन्त्यपि सन्निधेः सामर्थ्यात्तस्य षष्ठ्यार्थे प्रतीयते। तावतीमित्यादि-
शब्दस्य शेषसंनिधिर्नैसामंजस्याद्भावविकीर्षे इत्यपि दीर्घविस्तारविषयत्वात्। एष एव न्यायो दीर्घचतुरश्रस्यापि दीर्घविधावगंतव्यः।
अत्र श्लोकाः। चतुरश्रं समं द्वैधं कृत्वा भागांतरोपरि। त्रिःपि भागांतरे दीर्घचतुरश्रं तु तद्भवेत्। करिष्यमाणदीर्घस्य विस्तारं समपार्श्वके।
विभज्य शेषमधिकं यथायोगं हितक्रिया। तावती पार्श्वमान्या श्वशेषस्याजस्य भागतः। करिष्यमाणदीर्घस्य तिर्यग्यावद्विकी-
र्षितं। चतुरश्रं मंडलं चिकीर्षन् मध्यात्कोट्यां निपातयेत्पार्श्वतः परिकृष्यातिशयतृतीयेन सह मंडलं परिलिखेत्। सा नित्या मंडलं
यावद्धीयते तावदागंतु। चतुरश्रं मंडलं कर्तुमिच्छन् तस्य चतुरश्रस्याक्ष्णयारज्ज्वर्धप्रमाणात् किंचिदधिकामेकतः पाशीरज्जुं तान-
यात् चतुरश्रस्य मध्ये मे शंकौ प्रतिमुच्य तामक्ष्णयाकोट्यां निपात्य तत्र लक्षणं कृत्वा पार्श्वप्रदेशादतिरिक्तलक्षणयोरंतरालं त्रे-
धा विभज्य तेनैतो द्वौ भागौ हित्वा भागेनैकेन सहितया चतुरश्रस्यार्धप्रमाणया यथा भूमिं मंडलं भवति तथा परितः सर्वतो लिख-
त्। एवं कृते सा नित्या मंडलं चतुरश्रेत्रं भवति। सा नित्या यावती चतुरश्रभूमिर्मंडलेपि सा भवतीत्यर्थः। तत्र हेतुमाह। यावद्धीय-
ते तावदागंतु। यत्प्रमाणं हि त्रेहीयते इति रज्जूपते चतुरश्र क्षिप्तावन्मंडलस्य पार्श्वेषु आगंतुरज्जुपतेत स्मां नित्येति। ननु विष्कंभा-
र्धन परिक्षणाहार्धमभ्यस्य फलावमतिरित्यनेन न्यायेन भूमेर्नीयते तदल्पतानंतकथं नित्येति। उच्यते। यद्यप्यानित्या तथाप्य

न्येषामुपायान्तराणामतिस्थलत्वादस्योपायस्यासंनत्वात्सम्यगुपायस्य च प्रयत्नसाध्यत्वेनाशक्यत्वाच्चैवं वदतश्चाचार्यस्यायमेवो
पायः साधुरित्यभिप्रायः। यावदिह हीयते तावदागंत्विनितयोरल्पवैषम्यान्नावदेवेति प्रहन्निरोचनार्थमनित्यापि नित्येत्युक्तेल्प
दोषः। अथ वा यया रज्ज्वा मंडलं करोति सा रज्जुरिति रज्ज्वभिप्रायोपि तद्वत्। तत्रापि नित्येत्यादि समानं। मंडले चतुरश्रे मंडलविस्तार
प्रमाणो विष्कंभः तत्पंचदशधा विभज्य द्वौ भागावपनयेत्। शिष्टास्त्रयोदश भागाश्चतुरश्रस्य करणी भवति। अत्रापि सा नि
13 त्येत्यादि समानं। तावेव वाच्यपरिहारौ। द्विकरणीप्रभृतयः करण्य उक्ताः। तासां फलावगमायाह। प्रमाणेन प्रमाणं विधीय
ते चतुरश्रं यत्र प्रमाणेनैकेन विमाने तत्र सर्वतस्तेनैकेन परिमितं चतुरश्रफलं भवति। यथाष्टरूपं दक्षिणपक्षे इत्यादि।
आदेशादन्यतरा। आदिशतीत्यादेशः उपदेशस्तेनान्यच्चतुरश्रात्त्रिगुणादि फलमवगम्यते। आदिशतीत्यादेशो गणितशा
स्त्रात्ततो विषमादीनां फलमवगंतव्यमिति। उक्तं च तत्र सर्वेषां क्षेत्राणां प्रसार्य पार्श्वे फलं तदभ्यासजमिति। अस्यार्थः। सर्वेषां विष
मक्षेत्राणां पार्श्वपार्श्वमानी तिर्यङ्मान्यो प्रसार्य संपाद्य तदभ्यासेन तयोरन्योन्यगुणकाले फलमवगंतव्यमिति। त्रिकं
द्विधापच्छिद्यान्यतरच्छेदं यन्यत्रोपदध्यात्। तत्र सा दीर्घचतुरश्रा तथा युक्ता से च हीनेति वक्ष्यमाणेन फलावगमः। दीर्घ
चतुरश्रस्य पार्श्वमानीप्रमाणेन तिर्यङ्मानीप्रमाणमभ्यस्य फलावगमः। वृत्तस्य परिणाहार्धेन विष्कंभमभ्यस्य फलावग राम
मः। शरार्धप्रमाणेन धनुरर्धमभ्यस्य धनुषः फलावगम इत्यादि गणितशास्त्रादवगंतव्यमिति। प्रकृतमनुसरामः। द्वाभ्यां चतुरा १२

दि

रिउपलब्धेः।यत्रद्वाभ्यांद्विगुणप्रमाणेनविमानंतत्रसर्वतोद्विप्रमाणेचतुरस्रेप्रमाणपरिमितानिचतुरस्राणिफलंभवति।
।त्रिभिर्नव।त्रिप्रमाणेचतुरस्रेप्रमाणपरिमितानिनवचतुरस्राणिफलंभवति।यावत्प्रमाणारज्जुःतावतःस्तावतोवर्गा
करोति।यावंतिप्रमाणानियस्यारज्जोःसारज्जुःस्तावतःस्तावतःप्रमाणसंख्यायुक्तास्तावतस्तत्संख्ययागुणितान्वर्गान्स
मचतुरस्रात्करोति।वर्गःसमचतुरस्रइतिगणितेषुव्यवहारः।तथाचतुःपुरुषप्रमाणारज्जुश्चतुर्भिर्गुणितांश्चतुरोवर्गान्षो
डशकरोति।पंचप्रमाणारज्जुःपंचगुणितान्पंचविंशतिः।षट्प्रमाणाषड्भिर्गुणितान्षट्त्रिंशतं।सप्तप्रमाणेकोनपंचाशतं।अ म ५
ष्टप्रमाणाचतुःषष्टिं।नवप्रमाणाएकाशीतिं।दशप्रमाणाशतं।एकादशप्रमाणाएकविंशोत्तरशतं।द्वादशप्रमाणाचतुश्च
त्वारिंशच्छतमित्यादिद्रष्टव्यं।तत्रप्रमाणमाह।तथोपलब्धिः।उपलब्धिस्तथातथोपलभ्यते।उक्तेष्वर्थेषुप्रत्यक्षंप्रमाणमित्यर्थः।
तथाद्विप्रमाणंचतुरस्रंद्विधापछिद्यचत्वारिउपलभ्यंते।त्रिप्रमाणंत्रिधापछिद्यनव।चतुःप्रमाणेचतुर्धापछिद्यषोडश।एवंपं
चप्रमाणादिष्वपि।तथादीर्घस्याक्ष्णयारज्जुरित्यादिषुतथातथोपलभ्यंते।द्वाभ्यामेकमभ्यस्यफलमुपलभ्यते।त्रिभिर्द्वे
अभ्यस्यषट्।चतुर्भिर्द्वेअभ्यस्याष्टौ।तथाहि।द्विप्रमाणापार्श्वमानीकंएकप्रमाणेतिर्यङ्मानीकंद्विधापछिद्यद्वेउपलभ्यंते।द्विप्रमा
णपार्श्वमानीकं।त्रिप्रमाणतिर्यङ्मानीकंप्राग्विधोदक्त्रेधापछिद्यषडुपलभ्यंते।एवमन्येष्वपिपार्श्वमानीप्रमाणसंख्यया
पछिद्यतिर्यङ्मानीप्रमाणसंख्ययाप्रागपछेदइतिकृत्वाफलावगमः।इदानींसविशेषमुच्यते।अध्यर्धपुरुषारज्जुःद्वौसपादौकरो

त्यर्धतृतीयपुरुषावद्व्यस्सपादान् । अध्यर्धपुरुषप्रमाणेनाध्यर्धपुरुषमभ्यस्य फलं द्वौ सपादौ पादसहितौ द्वौ पुरुषौ करोति । अर्धतृती
यपुरुषाः षड् सपादान् । अर्धतृतीयं येषां ते अर्धतृतीयाः ते च प्रमाणं स्तुः । सार्धतृतीयपुरुषा येनाभ्यस्ताः फले सपादान् षड् पुरु
षान् करोति । उपलब्धिन --- अथार्धपुरुषचतुरश्रस्यार्धेनैवैकेन वा परिच्छेदः । प्रकृते रङ्कु एकमेकेन द्वावर्धौ पादश्चा एवमेव मन्त्रापि । उभ
यतः सच्छेदे । सपादारज्जुरध्यर्धं षोडशांशं च करोति । चतुरश्रस्य विहृद्द्वो हृद्द्वेत्रपरिज्ञानप्रकारमाह । अथात्यंतप्रदेशो यावता या
वताधिकेन परिलिखति तत्पार्श्वयोरुपदधाति यद्वतेन चतुरश्रं क्रियते तत्कोट्या । अंतः समीपप्रकरणे तदतीत्य वर्त्तत इत्यत्यंतं प्र
देशो विधिर्यस्य सो ऽत्यंतप्रदेशः सार्वत्रिक इत्यर्थः । समचतुरश्रविषयो ऽयं । यावत्प्रमाणेन यावताधिकेन यावत्प्रमाणाधिकेन ।
एको यावच्छब्दः प्रमाणमात्रविषयः । अन्यो ऽपि यावच्छब्दः आगंतुविषयः । यावत्प्रमाणेन यावन्मात्राधिकेनेत्यर्थः । परिलिखति
यच्चतुरश्रकरणार्थं परितो लिखति । तत्र तदधिकमागंतुकमूलचतुरश्रहेत्रपार्श्वयोः प्राचीमुदीचीवहेत्रमुपदधाति । संयोज
यति । यद्वतेनाधिकमात्रेण चतुरश्रं क्रियते तत्क्षेत्रं कोट्या संयोजयति । एतदुक्तं भवति । सर्वत्र समचतुरश्रहेत्रविहृद्धो विहृदस्य
चतुरश्रस्य चरक्षिणपश्चिमे भागे मूलप्रमाणकृतं चतुरश्रं परिकल्प्य तस्य तस्य पूर्वोत्तरपार्श्वयोरन्यत्पार्श्वमिति । इमं पार्श्वमा नी २
कं प्रमाणाधिकं मात्रतिर्यङ्मानीकं क्षेत्रं परिकल्प्य यद्वतेनाधिकमात्रेणैकेनैकं द्वाभ्यां चत्वारि त्रिभिर्नवेत्यादि फलकरणे । राम
चतुरश्रं क्रियते । तत्क्षेत्रं प्रागुदक्कोट्याः परिकल्प्येदिति । एवं सर्वत्र समचतुरश्रस्य हेत्रविहृद्धो हेत्रस्य परिगणने कुर्यादित्यर्थः । २४

अर्धप्रमाणेनपादप्रमाणंविधीयते।अर्धस्यद्विप्रमाणायाःपादपूरणत्वात्तृतीयेननवमीकला।अर्धप्रमाणेनप्रमाणार्धेनपाद
प्रमाणं।पादोत्रचतुर्थभागः।तत्प्रमाणेविधीयतेसंपद्यते।प्रमाणार्धमिदंक्षेत्रंप्रमेयस्यचतुर्थभागोभवति।कुतः।अर्धस्यद्विप्र
माणस्याःपादपूरणत्वात्।अर्धेनस्वद्विप्रमाणकृतायाभूमेश्चतुर्भागस्पृश्यति।तृतीयेननवमीकला।प्रमाणतृतीयेनक्षेत्रस्यन
वमोंशःपूर्यते।उपलब्धिस्तथा।एकप्रमाणायाभूमेरर्धेनप्राक्कोटक्कापच्छेदेकृतेऽर्धप्रमाणायाभूमेरेकप्रमाणायाःपादोद
श्यतेतस्य।एवंप्राक्कोटक्कावपच्छेदेप्रमाणतृतीयांमिताभूमिरेकप्रमाणयानवमोंशोदृश्यते।तथाचतुर्थांशेनषोडशीकला।।
पंचमेनपंचविंशतिकला।षष्ठेनषट्त्रिंशोंशःपूर्यते।एवमन्यान्यपिक्षेत्रफलानियोजनीयानि।।इतिकरविंदस्वामिकृतायां
शुल्बप्रदीपिकायांप्रथमःपटलः।।उक्ताःसामान्यतोविहाराः।इदानींदर्शपूर्णमासादिभविशेषविवक्षयाप्रथमभूताग्न्याधेय
विहारस्योगविधिरुच्यते।अग्न्याधेयकेविहारेगार्हपत्याहवनीययोरंतरालेविज्ञायते।अग्नययत्राधीयंतेयस्मिन्कर्मणितत्अग्न्याधे
यंतद्भवआग्न्याधेयिकः।विह्रीयंतेअस्मिन्नग्नयइतिविहारोदेवयजनदेशः।तमधिकृत्यगार्हपत्याहवनीययोरंतरालेगार्हप
त्याहवनीयशब्दाभ्यांतदायतनलक्षणाअंतरालश्रुतिसामर्थ्यात्।अंतरालेअंतरालंप्रकृत्यविज्ञायतेश्रूयतेसर्वत्रास्यैवार्थः। ५२
गार्हपत्याहवनीयग्रहणात्तयोरेवांतरालेश्रुतिरेवपद्यते।अष्टासुप्रक्रमेषुब्राह्मणोग्निमादधीतैकादशसुराजन्योद्वादशसुवैश्य
श्चतुर्विंशत्यामपरिमितेयावतावावक्षीयामन्येततस्मान्नातिहरत्याधेयइतिसर्वेषामविशेषेणश्रूयते।प्रक्रमंवदंतिद्विपदंत्रिपदं

वेति।अष्टप्रक्रमाद्योंतरालविशेषणं।अष्टासुप्रक्रमेष्वंतरालं स्यादिति।अपरिमितसंख्यायां तच्चतुर्विंशतेः परतः।तदानंतर्योरंतरा
ले गार्हपत्याहवनीययोर -- त्वात्तदायतन -- णां अंतराले क्रियते सामर्थ्यात्।अंतराले प्रक्रांतत्वाद्विज्ञायते क्रियते सर्वज्ञास्तामेगार्थः)
गार्हपत्याहवनीयात्।अपरिमितं प्रमाणाद्भूय इति कात्यायनः।यावतावाचक्षुषामन्यते।यावतावाप्रमाणेन चक्षुषा दृष्टा
15 तेन मन्यते।यथा दृश्यांश्च चतुर्विंशतिः प्रक्रम इति चक्षुषा मानं।यद्यपि चतुर्विंशतेः परत एव प्रयते।तथापि द्वादशसु विक्र घ
मेष्वित्यारभ्य यद्वादशसु विक्रमाः स्यादिति तैत्तिरीयकश्रुत्यनुरोधात् अष्टप्रक्रमादीनामपि सर्वेषां याज्ञीने नेयान अष्टक्रमः
स्यान्नैकादशप्रक्रमः।स्याद्वादशप्रक्रमा इति च भवति।तस्माच्चतुर्विंशतेरतिदूरमतिदूरेनाधेयं।अनेनापरिमितवचन
प्राप्तातिदूरता प्रतिषिध्यते।चतुर्विंशतिविधानादेव ततः प्रागतिदूरायोगः।चतुर्विंशत्यादिविधिश्च चतुष्टयं सर्वेषां ब्राह्मणा
दीनामविशेषेण भवति।द्वादशसु विक्रमेष्वित्यपि च सर्वेषामविशेषेण लभ्यते॥दक्षिणतः पुरस्ताद्द्वितीयदेशे गार्हपत्य
स्थानेदीयसी दक्षिणाग्नेर्विज्ञायते।दक्षिणतः पुरस्ताद्दक्षिणप्राक्कोणदेशे तस्य गार्हपत्यस्थानेदीयसी संनिकृष्टे तस्येव द्वि
तीयदेशे विशिष्टो हीनवचनः।किंचिद्धीनद्वितीयदेशांतराले दक्षिणाग्नेरायतनं क्रियते।तस्य विहरणमाह॥गार्हपत्याहवनी
ययोरंतराले पंचधा षड्भागसे अनुज्यपषष्ठे सप्तमेवा भागमागंतुसुपसमस्य समंत्रैधं विभज्यापरस्मिंस्तृतीये लक्षणं कृ राम
त्वा गार्हपत्याहवनीययोरंतौ नियम्य लक्षणेन दक्षिणायम्य निमित्तं करोति तद्दक्षिणाग्नेरायतनं क्रियते।सामर्थ्याद्धा गार्ह १५

णतपुरस्तादित्यादि श्रुतिबलादित्यर्थः। अत्र पंचधा पक्षो गार्हपत्याहवनीययोरंतरालस्य दक्षिप

प्रक्रमादि

पत्याहवनीययोरंतरालंअष्टमौर्विकंपंचधाभेदावासंस्तुत्यपगणयित्वाषष्ठसप्तमंवाभागमागंतुसुपसमस्य।पंचधागुणने
षष्ठं।षोढागुणनेसप्तमंभागंसुपसमस्येत।संयोज्यागंतुनासहत्रेधंत्रेधाविभज्यापरस्मिंस्तृतीयेगार्हपत्येसंनिहितेस्तृती
येलक्षणेनिरञ्छनेकृत्वागार्हपत्याहवनीययोरंतोनियम्यरज्जंतौपाशौकृत्वागार्हपत्यस्यपूर्वशंकौपश्चिमपाशंआहव
नीयस्यपश्चिमशंकौपूर्वपाशंचपतिमुच्यलक्षणेनदक्षिणापायम्यनिमित्तंचिह्नंकुर्यात्।तंनिमित्तेधनुराकृतेर्दक्षि
णाग्नेर्मध्यंविशेषाश्रवणात्।गार्हपत्याहवनीययोर्मध्यमेशंकौरंतोनियम्येति।किंचितदृष्टिसामर्थ्याद्दक्षिणाग्न्यायतने
मध्योपक्रांतात्दक्षिणोत्तरलंबात्पश्चिमोभागएकत्रिंशदंगुलयः।त्रिभागोनसप्ततिलाश्च।पूर्वोभागोअष्टाविंशतिरंगुल
भा६ यः।त्रिंशाधिकसप्तविंशतितिलाश्च।लंबकः।षड्त्रिंशदंगुलयःपादोनषोडशतिलाश्च।षड्धापक्षेद्वात्रिंशदंगुलसार्धसप्त
विंशतितिलाश्चपूर्वोभागलंबकःत्रिंशदंगुलयः।सप्ततिलाश्चपादोष्टकमितेंतरालएवं।प्रक्रममिते।एकादशादिभाग
योर्लंबकस्यप्रमाणमुन्नेयं।उन्नयनप्रकारंश्चात्रैववक्ष्यामः।अग्न्यायतनानिपिशिलमात्राणि।अथवा।अस्येषाधिष्णि
योर्हीयतइति।प्रजहितस्याधिष्णियत्वदर्शनात्।आयतनानांचतुरस्रमंडलत्वयोरनियमेनप्राप्तयोरपिमंडलमेवगा
र्हपत्यायतनं।अयमयोवैत्रयीविधेनुगाकृपर्यायैः।तस्यपृथिवीत्वश्रुतेः।मराकारत्वाच्च।नभसःचतुरस्रमाहवनीयंतत्रैवद्यु
लोकश्रुतेः।चतुरस्रमैंद्रस्थानमिति।शास्त्रांतरदर्शनाच्च।सभ्यावसथ्ययोरपिचतुरस्रमेवतयोस्तद्विकारत्वात्।अथयोगः।

गार्हपत्यायतनंपिशिलमात्रंचतुरश्रंविहृत्यमंडलंकुर्यात्।दक्षिणाग्नेरपिवचनात्पिशीलद्विकरणाचतुरश्रंविहृत्यमंड
लीकृत्यमंडलविष्कंभचतुर्भागेनेदक्षिणाग्न्यायतनं।तंत्रिमित्राउत्तरतःशंकुंनिहत्यतत्रशंकोतद्विष्कंभमध्येनियम्य
श्रंतौसमौकृत्वामंडलेविलिख्यतन्मंडलमध्येप्राचीलेखांविलिख्योदगार्धंत्यजेत्।दक्षिणार्धमायतनं।गार्हपत्यस्यपुर
स्तात्दष्टप्रक्रमादानतीत्यपिशीलमात्रंचतुरश्रमाहवनीयंकुर्यात्।तत्पुरस्तात्स्वेचरमवशिष्याहवनीयवत्सम्यं।तत्पुरस्तादाव
सथ्यमपितद्दत्यिशीलमात्रंचद्विप्रादेशंपिशीलंमुष्टिकृतेरत्निःपिशीलामेत्येके।गार्ह्यारंतरालेपिशीलमितिकेचित्।के
चित्प्रक्राम्यतइतिप्रक्रमइतिपदस्यापिप्रक्रमतामिच्छंतितदपिलभ्यते।अथयमत्रविमानक्रमः।गार्हपत्याहवनीयविक्षेपो
वियमाय।गार्हपत्याहवनीययोरंतरालमित्वाद्विदक्षिणापायम्यनिमित्तंकृत्वातेनैवलक्षणेनदक्षिणोत्तरतश्चनिमित्तंवि
पर्यस्यदक्षिणतउत्तरतश्चनिमित्तंकृत्वापिशीलद्विकरणीचतुरश्रमंडलविष्कंभाच्चतुर्थांशेनदक्षिणोत्तरयोर्निमित्तयोरु
रकृतनिमित्तद्वयानुकूल्येनशंकून्निखनेत्।अनयोःपश्चिमशंकोःपिशीलद्विकरणीचतुरश्रमंडलविष्कंभार्धेन।मंडलमा
लिख्यपूर्वशंकानुकूल्येनप्राचींज्ञात्वामंडलस्योत्तरार्धंत्यजेत्।दक्षिणार्धेदक्षिणाग्निंविक्षेपोभवति।आयतनविहरणानंतरं
प्रकृतिभूतयोर्दर्शपूर्णमासयोर्विहरणमुच्यते।यजमानमात्रीप्राच्यपरिमिताग्रायथासंज्ञा।नेहवीःपिसंभवेद्वेतिरश्री राम
प्रागेवेद्यःसाउन्नयतिप्रतीचीश्रोणीपुरस्तादंहीयसीपश्चात्प्रथीयसीमध्येसंनततरैवमिवहियोपेतिदार्शिकावेदेर्विज्ञायते। १६

यजमानमात्रीषस्मवत्यंगुलाप्राक्केनापरिमितान्तदधिकाप्राचीप्राग्भुगोसंभवोव्याप्तिः।यथाहवींषिपरस्परासंबाधेनग्रासे
न्नानिभवंतितथा।यथातिरश्चीतिर्यग्गानीस्यात्।आयामस्यत्रिभागोनापश्चात्तिरश्ची।आयामस्यैवार्धेनपुरस्तात्तिर
श्चीति।बोधायनःपशुबंधेचतथाहश्यपतेअरत्निभिर्वीचतुर्भिःपश्चात्षड्भिःप्राचीत्रिभिःपुरस्तादिति।विकृतिषुवदूहावि
षुबद्धविस्तारांअल्पहविषुप्रकृतिवत्।प्रोचोवेद्यंसाउन्नयतिप्राक्केनपूर्वांतमतीनावंसोकुर्यात्।प्रतीचीश्रोणीतथाप्रत
केनश्रोण्योकुर्यात्।अंहीयसीतन्वी।प्रथीयसीविस्तीर्णासंनततराअतिशयेननतेः।एवमिवहियोषेतिएवमिवहातिशब्दो
निपातसमुदायःप्रसिद्धवचनः।यथाएवमिवहिपशुः।एवमिवह्ययंत्रमयतइति।एतदेवहियोषासाहश्यंअस्याः।यस्मिन्मध्यामं
शातंदृश्यंसत्वंदृष्टुतरश्रोणीतेचाएतद्द्वतुःशिरवंडाइतिमंत्रवर्णोवलभ्यते।दार्शिकावेदेर्दर्शपूर्णमासयोःसाधारणापिवे
दिर्दर्शपूर्वेद्युर्दृश्यतइतिदार्शिकीत्युच्यते।यद्दर्शपूर्णमासयोःएकशेषंकृत्वानिर्देशः।एतद्विहरणेनव्याचष्टे॥अपरेणाहव
नीयंयजमानमात्रींदीर्घचतुरश्रांविहृत्यतावतीरज्जुमभ्यस्यमध्येलक्षणंकृत्वादक्षिणयोःश्रोण्यंसयोरन्तौनियम्यलक्षणे
नदक्षिणापायंम्यनिमित्तंकरोतिनिमित्तेरज्जुंनियम्यातोसमस्यदक्षिणायैश्रोणेर्दक्षिणंसमालिखेदेवमुत्तरतः।अपरे
णाहवनीयंआहवनीयस्यपश्चात्तसमीपेगार्हपत्याहवनीययोर्यद्यपिमहदन्तरालंतथाप्याहवनीयसमीपएववेदिः।किंचिद्वि
स्तारद्विगुणायामेंदीर्घमिच्छंति।उक्तप्रमाणदीर्घचतुरश्रमाहवनीयमपरेणविहृत्यश्रोण्यंसेषुशंकूंनिहत्ययागानायामदी

र्वमिच्छतिउत्क्रमान्नदीर्घचतुरश्रस्यप्रावतीरज्जुमभ्यस्यश्चायामद्विगुणांरज्जुंकृत्वामध्येलक्षणेनिरंछनंकृत्वालक्षणयोश्रोणंसयो
रंतौनियम्यनिरंछनेनदक्षिणापायंम्यशंकुंनिहत्यतस्मिन्रज्जुंप्रतिमुच्यपाशावेकीकृत्यश्रोणारभ्ययावदंसेहतन्नमार्गेण
17 लिखेत्।उत्तरपार्श्वेप्युत्तरतोपायम्यैवमेवकुर्यात्।तिर्यङ्मानींद्विगुणांतथाकृत्वापश्चात्पुरस्ताच्चोपलिखेत्।पूर्वांतिर्यङ्मा
नीपूर्ववद्द्विगुणांकृत्वापुरतोपायम्यदक्षिणस्मादंसात्प्रक्रम्योत्तरमंसेलिखेत्।पश्चिमयातिर्यङ्मान्यापश्चादप्येवमेवकु
र्यात्।विदीप्राचीमितीरज्जुंगार्हपत्याहवनीययोरंतरालमित्युक्तप्रकारेणवेद्यादक्षिणोत्तरमपायंम्यपूर्वविदृतीयदेशेल
कृ६ क्षणंकुर्यात्।उदंबहिर्वेदेरुत्तरतउत्करार्थंलक्षणंचकृत्वावेद्योःपश्चादस्यैवमेवविहृतीयेलक्षणंकुर्यात्।गार्हपत्याहवनीय
योर्मध्येमध्यदेशःतत्रलक्षणंकुर्यात्।विमितायांपुरस्तात्पार्श्वमान्यावुपसंहरेदितिसामर्थ्यात्।विमितायांचतुरश्राकृत
मात्रायांलेखाकरणात्प्रागेवपार्श्वमानिकापुरस्तात्पुरतउपसंहरेत्संकोचयेत्।दर्शपूर्णमासावेदिविहरणानंतरंप्रकृ
तिभूतस्यसोमस्यवेदिविमानमुच्यते।त्रिंशत्पदानिप्रक्रमावा।पश्चात्तिरश्चीभवतिषट्त्रिंशत्प्राचीचतुर्विंशतिःपुरस्तात्तिरश्ची
तिसौमिक्यावेदेर्विज्ञायते।त्रिंशत्पदानिपश्चात्तिरश्चीभवतीतितैत्तिरीकीश्रुतिः।त्रिंशत्प्रमितिशाखांतरीयाश्रुतोविकल्पः। कृ२
यद्यपिकर्मोपदेशःप्रक्रमशब्देनप्राग्वंशस्यमध्यमाह्वालाटिकात्त्रीन्प्राचःप्रक्रमानितितत्रापिश्रुत्योर्वैकल्पिकत्वेनपूर राम
दीनार्थःप्रक्रमशब्दस्तत्रप्रक्रम्यतइतिप्रक्रमशब्दः।पश्चात्तिरश्चीपश्चात्तिर्यङ्मानीप्राचीआयामःपुरस्तात्तिरश्चीपुरस्तात्तिर्यङ्मा १७

नीविमानमुच्यते॥षड्त्रिंशिकायामष्टादशोपसमस्यापरस्माद‌ंताद्द्वादशसुलक्षणंपंचदशसुलक्षणंदृष्ट्वांतयोरंतोनिय
म्यपंचदशिकेनदक्षिणापायम्यशंकुंनिहत्यैवमुत्तरतश्चश्रोणीविपर्यस्तयोसोपंचदशिकेनैवापायम्यद्वादशिकेशंकुंनि
हत्यैवमुत्तरतस्तावंसो॥षड्त्रिंशिकाषड्त्रिंशतप्रमाणारज्जुःतस्यामष्टादशोपसमस्यसंयोज्यापरस्मात्पश्चिमदंताद
रभ्यद्वादशसुलक्षणंमंसार्थपंचदशसुलक्षणंश्रोण्यर्थं।प्राग्वंशस्यमध्यमाद्भागाटिकातत्रीन्याचःप्रक्रमान्‌ऽतीत्यततः
पुरस्तात्षड्त्रिंशतप्रमाणांप्राचीलेखालिखेत।सापृष्ट्या।तदंतयोःशंकुंनिपात्यतयोःपाशोप्रतिमुच्यपंचेदशिकेन
लक्षणेनदक्षिणापायंम्यशंकुंनिहंतिसादक्षिणाश्रोणी।एवमुत्तरतोपायम्यशंकुःसोत्तराश्रोणी॥विपर्यस्तयोसो
विपर्यस्तत्याशयांसोमातव्योपंचदशिकेनैवापायंम्यद्वादशिकेशंकुःदक्षिणतउत्तरतश्चतावंसो।नत्रा।तदर्थमभ्यस्या
परस्मिनित्यनेनैवविहरणेनास्मिन्विहरणेसिद्धेकिमर्थमिहपुनर्वचनं।उच्यते।संख्यापूर्वीपगमार्थमितिकेचित्परिह
रंति।अनेकरज्जुविवक्षयेत्यन्ये।आया ‾ सेपुद्वादशसुलक्षणंपंचदशसुलक्षणंसप्तविंशत्यादेोनिरंछनमितिलक्षणबा
हुल्यप्रतिपादनार्थमित्यपरे।दीर्घचतुरश्राणांसमचतुरश्राणांचतत्रविहरणमुक्तं।इहतुविषमदीर्घचतुरश्रस्येत्यपरे।
नदेकरज्जुविहरणं।एकावासोरज्जुश्चेत्येकरज्जुःएकयैवरज्ज्वाश्रोण्यंसानांविहरणमेकरज्जुविहरणंद्विशंकुनात्रिशं
३१ कुनापंशंकुनावा।योगेनयद्विहरणमुक्तं[illegible]सानांविहरणमेकरतदिदमित्युक्तंभवतुभाषतेअनेकरज्जुविधित्साया।त्रिक

चतुष्कयोः पंचिकाहरणयारज्जुः। त्रिके त्रिप्रमाणां चतुष्कां चतुष्प्रमाणां पंचिकां पंच त्रिकचतुष्कयोरिति। आयामाभ्यासात् प्राप्तमन्
यतेन तदभ्यासेन श्रोणी एवं सविधानार्थ एवमुत्तरेष्वभ्यासेषु। ताभिस्त्रिरभ्यस्ताभिरंसौ। ताभिः पृथक् पृथक् त्रिरभ्यस्ताभिस्त्रिरुप
हिताभिः त्रिका त्रिरभ्यस्तान् षोडश पंचिकान् विंशतिस्ताभिरंसौ मंतव्यौ। चतुरभ्यस्ताभिः श्रोणी। त्रिकाश्चतुरभ्यस्ताभिः पंच
दश चतुष्का विंशति पंचका पंचविंशतिः। ताभिः श्रोणी मंतव्यौ। यूपावटीयशंकोः पश्चात् षोडशसु शंकुन्निहत्य तस्मिन् त्रिरभ्य
स्तां पंचिकां प्रतिमुच्य यूपावटीये त्रिरभ्यस्तां त्रिकां प्रतिमुच्य ताभ्यामंसौ। तथा षोडशस्थितशंकौ पंचिकां चतुरभ्यस्तां प्रतिमुच्य।
प्रथमनिहतशंकौ चतुरभ्यस्तां त्रिकां प्रतिमुच्य ताभ्यां श्रोणी। आयामाभ्याससिद्धमिदमायामद्विगुणाभ्याससिद्धं वा। द्वादशि
कपंचिकयोस्त्रयोदशिकाहरणयारज्जुः। समं सार्थमिदं। ताभिरंसौ द्विरभ्यस्ताभिः श्रोणी। यूपावटीयशंकोः पश्चात् पंचसु शं
कुं निहत्य तस्मिन् त्रयोदशिकां प्रतिमुच्य यूपावटीये द्वादशिकां प्रतिमुच्य ताभ्यामंसौ। तदा प्रथमनिहितशंकौ द्विरभ्यस्तां
पंचिकां प्रतिमुच्य यूपावटीये द्विरभ्यस्तां त्रयोदशिकां प्रतिमुच्य ताभ्यां श्रोणी। अर्धाभ्यासप्राप्तमिदं। आयामचतुर्गुणाभ्या
सप्राप्तं वा॥ पंचदशिकाष्टिकयोः सप्तदशिकाहरणयारज्जुस्ताभिः श्रोणी। प्रथमनिहितशंकोः पंचदशिकान्ततः परस्मादष्टा
सु सप्तदशिकान्ताभ्यां श्रोणी। आयामत्रिगुणाभ्यासमिदं। आयामतृतीयद्विकाभ्यासप्राप्तं वा। द्वादशिकपंचत्रिंशिकयोः स राम
प्तत्रिंशिकाहरणयारज्जुस्ताभिरंसौ। इदमपिगतार्थं। यूपावटीये द्वादशिका प्रथमनिहितशंकोः पुरस्तात् पंचममात्रे शंकुं निहत्य त १८

स्मिन्सप्तत्रिंशिकाताभ्यामंसौ। पंचमांशद्वयाभ्यासप्राप्तमिदं पंचगुणाभ्यासप्राप्तं वा। एतावंति ज्ञेयानि वेदिविहरणा। निभ
वंति। शुद्धमूलतया ज्ञातशक्यान्येतावंत्येवेति सावधारणा। एतावंत्युक्ता निश्चन्यान्यप्युन्नेयानि सच्छेदाभिरज्जुभिः निर्ह्री
स विशुद्धिभ्यो वेदिविहरणानि भवंत्येव। यद्यपीदमेकं विहरणं। एकरज्वाद्विशंकुयोगेन व्याख्यातं तथा त्रिशंकुपंचशंकु
भ्यामपि निर्ह्रीसविशुद्धिभ्यो यथायोगं विहर्तव्यं स्तरयातयोर्विधानस्पष्टार्थत्वकल्पनाप्रसंगात्। अतो निर्देशेन मेतस्य
र्वविहरणानां। अष्टाविंशत्योनं पदसहस्रं महावेदिः। द्वासप्ततिर्नवशतानि च पदपरिमितानि क्षेत्राणि महावेदिः। प्रक्रममा
नेप्येवोपदग्रहणं किमर्थं। उच्यते। पदग्रहणं महद्ग्रहणार्थमिति ज्ञायते। विद्याः पदमाने न हीने सदसो हविर्धानयोरपि पूर्वेन मानं
नारत्निभिः। उत्तरवेदिश्च युगमात्री न सर्वतो दशपदेति प्रक्रममितायां वेद्यामरत्निविहितयोः। उत्तरवेदिश्च विहितयोः सदो
हविर्धानयोः सर्वतो दशपदयोः उत्तरवेद्यासंभवात्। पदेनैव सदोहविर्धानयोर्विमाने युगमात्र्युत्तरवेदिरिति सिद्धं। संख्या
नप्रयोजनं विशिष्टतीयेयजतस्त्यादिषु क्षेत्रतृतीयाग्रहणं न प्रमाणमिति। तृतीयग्रहणमितिकथं संख्यायत इत्याह। दक्षि
द्वितीये प्रस्तारे उभाप्यये पंचपंचमभागीयाः उपदध्यात्। अविशेषादात्म उभयोः समप्रविष्टाः। ता आत्मनि चतुर्दशभिः पादैर्यथा
36 योगमुपदध्यात्। ना विशया चतुर्दशभिः पादैः प्रकृतत्वात्पंचमभागीया नो यथायोगं परितः सर्वत उपदध्यात्। विशयानां उरस्रा
द्दशाद्दक्षिणतो द्वे उत्तरतश्च द्वे। सर्वमग्निं पंचमभागीयाभिः प्रच्छादयेत्। पक्षयोस्त्रिंशत्त्रिंशत्पंचमभागीयाः। उरस्रात्पृत्यात्मनि प्र
च्छाद्यमाने उदगायताः पंचमभागीयानां नवरीतयः। चतुर्दशानां पादानां दक्षिणतो द्वे पंचमभागीये उत्तरतश्च द्वे। उभे तु यथोक्ता
भिः प्रच्छाद्यमाने बहूभेदप्रसंगात्। षड्भागीया उत्पन्ना अपि न विनियुक्ता इति। षड्भागीयास्त्रिस्त्रिस्रो विशयानो पश्चात् उभयोः
श्रोण्योः प्रतीचीरुपदधाति। तासां पार्श्वे द्वे चतुर्भागीये प्रतीच्या उपधाय। तासां मध्ये तिस्रः षड्भागीयाः प्रतीचीरुपदध्यात्। अपरार्धे
वा अष्टावपरस्मिन्नेष्टका उपदध्याद्वा। आत्मनि विशयाभिः सहैकोनशतं पंचमभागीयाः। चतुर्दश पादेष्टाः। पक्षयोस्त्रिंशत्त्रिंशत्पंचमभा
गीयाः। उभे द्वादश चतुर्भागीयाः। नवषड्भागीयाः। ता एताः षड्नं द्विशतं। अत्र षड्संख्यासंपाद्या। पादेष्टकाभिः संख्यां पूरयेत्। अत्र न
व पंचमं भागीयाः। रीतीनां मध्यरीतिमुद्धृत्य मध्ये विंशतिं प्रादेशेष्टका उदीचीरुपदध्यात्। अत्र चतुःसंख्यारीतिरुच्यते। अतिरेको विक राम
प्रमाणोपधानेन संख्यापूरणस्य न्याय्यत्वाद् एकाः पंचदशभागीयानां स्थान इति परिभाषया। अत्र एकोपधानेन संख्यापूरणस्य ३६

न्यप्यत्वात्॥ ततः प्रादेशारीत्याः पूर्वरीतिर्यथाम्लिष्टा भवति तथा कृत्वा॥ तत्पूर्वरीतिमुद्धृत्य तत्राष्टाव एककाउपदध्यात्॥ एवं प्रादेश
रीत्याः परतन्नियोरीतिः प्रचाल्य द्वितीयां रीतिमुद्धृत्य एककाउपदध्यात्॥ एवं द्विशतः प्रस्तारः॥ अत्र केचित्प्रथमे प्रस्तारे पुछाग्रे दशप्रा
देशानुपधायपारेष्टकाधनाहृत्य पंचदशभागीयाभिः संख्यापूरणं कृत्वा अपरस्मिन्नपि प्रस्तारे षड्भागीयाः पारेष्टकाधनाद
त्य पंचदशभागीयाभिः संख्यां पूरयंति॥ भेदमपि सहंते॥ प्रथमेपि प्रस्तारे संध्यंतराले अर्धएककाभत्यादार्धापदधाति॥ तथोपधा
ने प्रयोजनं मृग्यं॥ केचित्तु पश्चादनकाले संख्यापूरकार्धौ स्थानमवशिष्य पश्चाय संख्यापूरकाउपदधाति॥ तन्न उत्तु पूर्वोजस्य म
ध्विवानवेति चिंत्यं॥ उर्वस्थिशद संयुक्ताकृतिर्मुख्या तथा कृता आचार्येणैव सूत्रार्णौ षड्भागीया कृते तु सा॥ आख्यातं मशका
वार्यैर्थयोर्वस्थीति सूचितं॥ षड्भागीयापरं तद्दप्यन्यैः सूचितं परैः॥ हिरण्यकेशिनाप्युक्त्वेन तयोर्वस्थीति सूचितं व्याख्यातारो
पि तन्नैतत्षड्भागीयापरं विदुः॥ बोधायनस्य भगवान् समवत्तुरस्य के॥ तुर्यपंचमषष्ठेषु संपादैः करणे व्यधात्॥ उर्वस्थिनाम
ध्येयाप्युपदेशबलादिह॥ पक्षादिकानाममितकृगाधः सूत्रकृतेष्यते॥ अरत्नयोप्यएककाश्च बाहनेस्य विपर्ययात्॥ पूर्वस्मिन्नप
रस्मिंश्च प्रस्तारे संभवेन हि॥ न पंचदशभागीयाः कथ्यंते द्वितीयके॥ कथ्यंते ताः कृपूर्वाभ्योनतत्पूर्वो द्वितीयतः॥ प्रकृतित्वं द्वयो
रप्येनोनित्यत्वाद्द्वयोरपि॥ अतन्नासा॥ द्वितीये प्रोकथंप्राप्तिर्विमृश्यतां॥ किंचतासांतु यत्कार्यं तत्रार्धएककाकृबोधितं॥ प्रथमो
परतोन्यत्र तत्र स्थाने स्फुरएककाः येत्वत्र पंचदशभागीयाभिः संख्यापूरणं कुर्वंति ते किमुपदेशतो वा प्राप्तं मन्वते अतिदेशतो

वाउभयथापिनयुज्यतेद्वयोः प्रकृतित्वात्। प्रकृतिविहाराभावाद्या नवएस्काः पंचदशभागीयानोस्थानइतिवचनसामर्थ्यात्
सांप्राप्तिर्भविष्यति। पंचदशभागीयाभिस्त्रएकपादाभिस्ततएकाश्चर्धाभिःततएकपादाभिस्ततस्त्रिभिर्द्वादशभिःततएकाप
दाभिःततएकार्धाभिःततएकापादाभिःततस्त्रिभिर्द्वादशभिरन्यार्धाभिः। एवंसप्तदशारीतयः। तत्रपंचमीषष्ठीसप्तमीनोरी
तीनामेत्यस्त्रिस्त्रउद्धृत्यैकांद्वादशीमुपदध्यात्। अथैकादशीत्रयोदशीनामेत्यास्त्रिस्त्रउद्धृत्यैकांद्वादशीमुपदध्यात्। एवंद्वितीयः
यद्वितीयत्रयोदशीभिर्हदीच्योरीतयः। चतुर्दशानासीप्रथमार्धाभिःद्वादशत्रयोदशीभिः। अन्यार्धाभिःनाश्चतुर्दशारीतयःद्वा
दशीभिःशतमिष्टकाःतत्रपूर्वार्धेत्रयोदशीषडुद्धृत्यचतुर्विंशतिपादाउपदध्यात्। एवंद्विशतः। यदिसर्वेप्रस्तारद्वादशीभिःत
दापूर्वोक्तप्रकारेणप्रथमंप्रस्तारमुपधायद्वितीयप्रस्तारेताएवरीतीरुदीचीरुपदध्यात्। एवंद्विशतः। यदिसर्वेत्रयोदशीभिःत
दाद्वितीयप्रस्तारोत्तारीतीः प्रथमेप्रस्तारेप्राचीरुपधायपश्चार्धेत्रयोदशीउद्धृत्यपादाउपधाय। अपरस्मिन्प्रस्तारेताउदीचीरु
पदध्यात्। एषद्विशतः। यद्येकतःत्रयोदशाअन्यतोद्वादशतथाप्रागायताइष्टकाउदीचीत्रयोदशारीतयःताःषट्पंचाशच्छतेचप्र
र्वस्यांरीत्यांयेचस्यातांष्टावष्टाउद्धृत्याष्टाविंशतिपादाःद्वेद्वेयार्धेएवंद्विशतः। द्विशतप्रस्तारेताएवप्राच्योरीतयः। तत्रदक्षिणतउ
त्तरतश्चाष्टावष्टाउद्धृत्यपूर्ववत्पादाः। अर्धाश्चोपदध्यात्। एवंद्विशतः। एवमेवप्रउगादिष्वपिकरणानिद्वादशभागीयाभिस्त्रयो राम
दशभागीयाभिर्वाउभयीर्वायथायोगमुपधायपादेष्टकाभिरर्धेष्टकाभिश्चसंख्यांपूरयेत्। अलमतिप्रसंगेन। व्यासेविज्ञया ३६

२

36/2

द्यावतः प्रस्ताराः ष्ट्रिकोर्ध्वंगतं। विकृतिषु पुनर्व्यत्यासवचनं किमर्थं। उच्यते। प्रकृतौ चितीनां प्रस्ताराणां च वैषम्यात्। किमर्थं
व्यत्यासः प्रस्तारधर्मः उत चितिधर्म इति। कस्यचित्संदेहः स्यात्। विकृतौ तु द्विप्रस्ताराश्चितयस्त्रिप्रस्ताराश्चितय इति प्रस्तारयोर्वैष
म्येणायं व्यत्यासः। कस्य धर्म इति संदेहे यावन्तः प्रस्तारास्तावन्तो व्यत्यस्य चिनुयात्। भेदाभावाय व्यत्यासस्य प्रस्तारधर्मता। तत्प्रति
पादनाय पुनर्वचनं व्यत्यासस्य। ११ एकविधप्रभृतीनां प्रथमाहारेण द्वितीयेन तृतीयेनेति योऽनुज्येत सर्वेषां यथाकृति संख्यातः पौ
रुषप्रमाणो। एकविधप्रभृतिषड्विधपर्यन्तानां प्रथमाहारः प्रथमप्रयोगः। योऽनुज्येत भूयसी संयुक्तो भवति। यथाकृतिसंख्याकृत्स्नकप्र
कारेण संख्या साहस्रादि यथा भूयांसोऽनुज्यते न योर्ध्वप्रमाणो जानुदघ्नादिर्यथा योऽनुज्येतेति च संबंधः। एकविधप्रभृतिषड्विधपर्यन्तानां
सर्वेषां प्रथमाहारेण द्वितीयाहारेण तृतीयाहारेण साहस्रं चिन्वीत प्रथमं चिन्वान इत्याद्याः श्रूयमाणाः साहस्रादिसंख्या जानुदघ्ना
दिपरिमाणाश्च एतेषु संपाद्यन्ते योपदिश्यन्ते। एतेन एकविधस्य प्रकृतित्वे द्विविधादीनां तत्प्रकृतित्वे च साहस्रादिसंख्या जानुदघ्ना
दिपरिमाणत्वं सिद्धं भवति। एकविधादयोऽपि नित्या एव। अयकामसंबंधात् प्रकृतयो विकृतयश्च नित्या उक्ताः। इदानीं काम्याः प्रउगा
द्यचीते। काम्या गुणविकाराः। नित्यस्य सप्तविधस्याग्नेर्विकाराः प्रउगाद्याकृतिविशेषेण गुणेन विकृताः। कुतः। गुणशास्त्रत्वात्। गु
णशास्त्रं विदधातीति गुणशास्त्रं। प्रउगचितिं चिन्वीतेति विधीयमाने वाक्ये प्रउगस्याग्नेः श्येनमन्तश्चाभ्रातृव्यापनोदनादिफलाद्युप
उगाद्याकृतिविशेषगुणो विधत्ते। तस्मात्काम्याः प्रउगादयो गोदोहनादिवन्नित्यस्याग्नेर्गुणविकाराः। न नित्यास्ते ष प्रकृतय इति। प्रउ

37

गच्छितं चिन्वीत भ्रातृव्यवानिति विज्ञायते। प्रउगः शकटस्य पूर्वभागः। तदाकृतिमग्निं चिन्वीत भ्रातृव्यवान् भ्रातृव्यैर्बाध्यमानः। तेन भ्रा
तृव्यान् प्रणुदत एव। यावानग्निः सारत्नि प्रादेशो द्विसप्तावतीं भूमिं चतुरश्रीकृत्वा पूर्वस्याः करण्या अर्धाच्छ्रोणी प्रत्यालिखेत्। सा नित्या प्र
उगा। यावानरत्नि प्रादेशाभ्यां सहितः सप्तविधः तावद्द्विगुणी समचतुरश्री भूमिः कृत्वा तस्य चतुरश्रस्य पूर्वस्याः करण्या मध्यमाद्
रभ्य श्रोणी प्रत्यङ्मुखाया लिखेत्। सप्तविधस्य द्विसप्तावती भूमिः। पञ्चदश पुरुषाः तस्याः करणी त्रयः पुरुषाश्चतुरधिकशतांगुलयः
पञ्चविंशतितिलाश्च। तथापरेण प्रणावद्देशे संचरमवशिष्यानुपश्चात्समचतुरश्रं विहृत्य पूर्वस्याः करण्याः अर्धाच्छ्रोणी प्रत्यालिखे
त्। सा भूमिः सप्तविधपरिमिता प्रउगाकृतिर्भवति। करणानि चयनमित्येकविधोक्तं तत्र प्रउगा इष्टकाः कारयेत्। अत्र करणानि
करणीनो द्वादशत्रयोदशकृतानि तानि मिश्रयनं प्रसारयत्या स इत्येवमाद्येकविधवद्ग्राह्यमित्यर्थः। विशेषतस्तु प्रउगा इष्टकाः कारयि
ता करणानि प्रउगाकृतीनि भवेयुः। तेषां द्वादशत्रयोदशभागीयापादार्धार्धप्रउगाकाराग्राह्याः। चत्वारः पुरुषा एकोनचत्वारिं
शदंगुलयः एकविंशतितिलाश्च प्रउगस्यैषा मात्रा। सा प्रउगस्य पार्श्वमानी। तस्या द्वादशेन त्रयोदशेन च करणानि कारयेत्। प्रा
दार्धाश्च द्वादशभागीयानामष्टत्रिंशदंगुलयः पञ्चविंशतितिलाश्चैषा मात्री तन्मुखपार्श्वमान्यो त्रिचत्वारिंशदंगुलयः दशति
लाश्चार्धेष्टकानामेका पार्श्वमानी सैव च अन्या अष्टत्रिंशदंगुलयः पञ्चविंशतितिलाश्च एकोनविंशतिरंगुलयः अर्धत्रयोदशतिला राम
श्च मुखे। पादेष्टकानामेकोनविंशतिरंगुलयो द्वाविंशतितिलाश्च एके सुखे पार्श्वमान्यावेकविंशतिरंगुलयः द्वाविंशतितिलाश्चाश्च यत्रयो ३७

दशभागीयानांतासांपंचत्रिंशदंगुलयः।पंचविंशतितिलाश्चैकंसुखं।पार्श्वमान्यौतिलोनचत्वारिंशदंगुलयः।अर्धेष्टकानामपिचैका
पार्श्वमानीअन्याःपंचत्रिंशदंगुलयःपंचविंशतितिलाश्च।सप्तदशांगुलयःएकोनत्रिंशत्तिलास्तिलार्धश्चैकंसुखं।पादेष्टकानांसप्तद
शांगुलयःएकोनत्रिंशत्तिलाश्चैकंसुखं।पार्श्वमान्योविंशतिरंगुलयःअर्धतिलोनाः।उपधानेप्रथमेप्रस्तारेप्रउगमुखेचतुःषष्टिर्पादे
ष्टकाउपदध्यात्।श्रोण्योअंतश्चःचतुर्विंशोत्तरेशतेद्वादश्यः।चतस्रोर्धेष्टकाः।एषद्विशतः।अपरस्मिन्श्रोण्योर्विंशतिर्विंशतिः।त्रयो
दशपादाःद्वावर्धे।अष्टपंचाशदधिकेशतेत्रयोदश्यः।एषद्विशतः।प्रस्तारस्यव्यत्यासश्चमात्राः।उभयतःप्रउगंचिन्वीतयःकामयेत
प्रजातान्भ्रातृव्यान्नुदेयप्रतिजनिष्यमाणानितिविज्ञायते।उभयतःप्रउगमुभयतःशकटमुखंजातान्शत्रून्प्रणुदेयजनिष्य
माणांश्चप्रणुदेय।यथानजायंतेतथाकरवाणीत्यर्थः।इतिपदंव्याचष्टे।यथाशकटेविमुखे।नानामुखेशकटेयथाश्लिष्टेसंहिते
भिश्रितेतादृगाकारमुभयतःप्रउगंतथाचिन्वीतेत्यर्थः।तावद्वेदीर्घचतुरश्रंविहृत्यपूर्वापरयोःकरण्योरर्धात्तावतिदक्षिणोत्तर
योर्निपातयेदंसानित्युभयतःप्रउगंप्रउगचितोक्तं।सारत्निप्रादेशसप्तविधस्यद्विगुणादीर्घचतुरश्रंविहृत्यतिर्यङ्मानीपार्श्वमानी
नोमध्येशंकुंनिहत्य।पूर्वस्मात्शंकोर्दक्षिणंशंकुंप्रत्यक्ष्णयालिखेत्।दक्षिणतःपश्चिमेपश्चिमतउत्तरतःपूर्वेएवंलिखेत्।उभयतःप्र
उगाकृतिक्षेत्रंभवति।विस्ताराद्द्विगुणायामेदीर्घेपंचपुरुषाःसप्तदशांगुलाश्चायामाः।द्वौपुरुषावष्टषष्टिरंगुलयः।एकविंशतितिला ४२
श्चतिर्यङ्मानीदीर्घचतुरश्रस्य।उभयतःप्रउगाइष्टकाःकारयेत्।करणानिचयनविधिश्चप्रउगवत्।विशेषतस्तु।उभयतःप्रउगाइ
ष्टकाःत्रयःपुरुषाःसप्तांगुलयःसप्तदशतिलाश्चैषांप्रमाणं।अस्यद्वादशोभागस्त्रिंशदंगुलयःपंचविंशतितिलाश्च।त्रयोदशोभागो

ष्टाविंशतिरंगुलयः। त्रिभागोनानवतिलाश्च। शतद्वयमष्टाविंशतिरंगुलयएकविंशतितिलाश्चोभयतः प्रउगस्य तिर्यङ्मानी। तस्या
द्वादशभागेन त्रयोदशभागेन परिमिते करणी यथा भवति तथा भवेत्करणी। अर्धेष्टका द्वादशभागीयाभिः त्रयोदशभागीयाभि
श्चायामतस्तत्कल्या विस्तारतस्तदर्धविस्ताराः पादेष्टका आयामतो विस्तारतश्चार्धाः। प्रथमे प्रस्तारे यत्र पादास्तउपहितास्ते द्वितीये तदन्यत्रो
38 पधेयाः। द्वादशभागीयापक्षे चतस्रोर्धेष्टकाः। त्रयोदशभागीयापक्षे द्वे। रथचक्रचितं विचीनश्चात्वव्यानिति विज्ञायते। रथचक्रं मंड
लाकारं श्चात्वव्यवान्नैर्वीध्यमानस्तेजेतु। यावानग्निः सारत्निप्रादेशस्तावतीं भूमिं परिमंडलीकृत्य। तस्मिंश्चतुरस्रमवदध्याद्या
वत्तं भवेत्। अरत्निप्रादेशसहितस्य करणी द्वे उ रूपावष्टाशीतिरंगुलयः। विष्कंभार्धं। एकविंशतितिलाश्च। तस्य मध्ये यावत्तं भवे
च्चतुरश्रे विहृत्य लिख्य। तस्य करण्या द्वादशेनेष्टकाः कारयेत्। चतुरस्रस्य करणी द्वे शते चतुःषष्टिश्चांगुलयः। त्रयोदशीतिलाश्च।
तस्या द्वादशभागः सतिला विंशतिरंगुलयः। चतुर्भिर्द्वादशभागीयानां करणी तन्मध्ये चतुश्चत्वारिंशच्छतमिष्टकाः। तासां द्वा
दशभागीयानां षष्टीष्टकाः एकैकस्मिन्प्रस्थाउपधाय सं[illegible]शेषं प्रथिशेषमष्टधा विभजेत्। तत्र पूर्वस्मिन्नयोदक्षिणार्धे चतुर
श्रकरणी समीपे दक्षिणोत्तराश्निश्रो द्वादशभागीयाः उत्तरतो व्यवलिख्य शेषं प्रत्यर्धं चतुर्धा विभजेत्। एकैकस्मिन्भागे एकैकं
करणं तिसृणां द्वादशभागीयानां पुनः तावद्वौ भागौ। तस्मिन्दक्षिणतो द्वौ भागौ एवं विभाग चतुर्णां विभागानां पश्चात्तिर्यङ्मानी
त्रयस्त्रिंशदंगुलयः एकतिलं। तत्र दक्षिणभागस्य करणी। त्रिभिः पक्षे भवति। तत्र तिर्यङ्मानस्य का चतुर्णां समेति। पार्श्वमान्यपेकै राम
वसावषट्त्रिंशदंगुलयः द्वादशतिलाश्च। द्वितीयं वक्रत्वे द्विचत्वारिंशदंगुलयः सार्धाः पंचविंशतितिलाश्च। तत्र। विष्कंभार्धप्रमाण ३७

यारज्वाकर्करेनवालिख्यतन्नयेत्। द्वितीयदक्षिणपार्श्वमानीसेवयादक्षिणस्योत्तरातिर्यग्मानीचोक्ता। उत्तरपार्श्वमानीद्विचत्वारिंश
दंगुलयः। सार्धाः पंचविंशतितिलाश्च। सुरुंचतुस्त्रिंशदंगुलयोदशतिलाश्चतत्सर्वंतन्नयेत्। तान्येवविपरीतान्युत्तरार्धेकरणानिएषे
वोत्तरार्धेविभागकल्पना। तत्रसर्वेषांसेवपश्चात्तिरश्चीदक्षिणेषांदक्षिणमुत्तरेषांदक्षिणंभवति। तान्येवमुखगानि। अत्रचतुर्थवंवमं। पं२
तृतीयवत्षष्ठं। द्वितीयवत्सप्तमं। प्रथमवदष्टमं। एवंदक्षिणोत्तरपश्चिमप्रथिष्ठदक्षिणपश्चिमोत्तरमुखांतरेतानिकरणानिभवंति। तप
धानेचतुरश्रस्यावांतरदेशान्प्रतिस्रक्तिः संपादयेन्मध्यानीतरस्मिन्प्रमारेव्यत्यासंविभुयाद्यावतः प्रस्तारः स्त्रिकीर्षेत्। गतं। द्रोणचि
तंचिन्वीतान्नकामइतिविज्ञायते। अन्नाधारेपात्रेद्रोणमित्युच्यते। तदाकारंचिन्वीतान्नकामः। द्वयानितुखलुद्रोणानिचतुरश्राणिपरिमं
डलानिच। तत्रयाथाकामीशशार्थस्यविशयत्वात्। उशाद्रोभेदेनप्रउगादिवदेकप्रकाराणिद्रोणानिकिंतुद्विप्रकाराणिचतुरश्राणि
परिमंडलानिच। खलुशब्दः प्रसिद्धौ। याथाकामीशाद्रार्थस्यविशयित्वात्। गतं। उभयत्रद्रोणशब्दप्रयोगात्। उभयप्रकारोग्राह्यो। चतुर
श्रेवायस्यगणशास्त्रं समचतुरश्राः चतुरश्राण्येवग्राह्याणि। कुतः। यस्यैवंगणशास्त्रंचतुरश्रशाकृतेचतुरश्रमग्निमन्नद्यं(?)न्नकामा
यद्रोणाकारंविधीयते। अतइदमपिचतुरश्रमेवग्राह्यमित्यर्थः। यस्याग्नेः पश्चात्सरुर्भवत्यनुरूपत्वायेतिविज्ञायते। आत्मनः पश्चात्पु
च्छस्थानेसरुर्भवति। सरुर्मुष्टिः। प्राङ्मुखावस्थितस्यपुरुषस्यपश्चात्स्थितोद्रोणोपिपश्चान्मुष्टिर्भविष्यति। एवमिहापीत्यर्थः। सर्वस्य
श्रमेर्दशमंसरुतस्यप्रउद्वेननिर्हारउक्तः। सर्वस्याग्निर्नेत्रस्यदशमांशोसरुः। द्वादसोनपउसमकनिर्दशः। सारत्निप्रादेशस्यदशमोभा

39

गोद्वादशभागीयाइत्येवंतस्यसरेनिर्ह्रासः।समुदायात्पृथक्करणेउच्छेदेनउच्चप्रदेशेनभवेत्।सत्रकोनिर्ह्रासः।चतुरश्राबहुरश्रेनिजिह्
र्बनितिचतुरश्रस्यात्मनःकरणीसतत्रयमेकादशोगुलयः।षट्त्रिंशतितिलाश्च।सरोक्तल्पाधिकशतमंगुलयःएकत्रिंशतितिलाश्च।
तस्यकरण्याद्वादशेनेष्टकाःकारयेत्।अर्धाःपादेष्टकाश्च।तस्यद्विगुणस्यकरणीद्वादशकःषट्त्रिंशतिरंगुलयस्त्रिलोना।द्वादशभागी
यानांकरणीएकतःषट्त्रिंशतिरंगुलयस्त्रिलोनाः।अन्यत्रएकोनचत्वारिंशदंगुलयश्चअर्धतिलोना।द्वितीयेकरणेपादेष्टकाद्वादश
भागीयानामेव।चकारादर्धेष्टकाश्चताभिर्विनासंख्यापूरणाशक्तेः।उक्तंचशुल्वान्तरे।पादेष्टकाअर्धेष्टकाश्चेति।प्रथमकरणमह्ण
याभिंद्यात्।सापादेष्टका।अथद्वादशभागपार्श्वमानिकानतुरीयं।तिर्यङ्मात्रापादेष्टका।उपधानेअर्धाः।पुरस्तात्प्रतीचीरात्मन्युपद
ध्याति।आत्मनिपूर्वभागेद्वादशेष्टकाःप्रतीचीरुपदधाति।सर्वमन्येचनवस्रःश्रेण्योःप्रत्येकंचनवस्रः।एवंचतुर्विंशतिरर्धाः।सर्वमग्निं
चतुरश्राभिःप्रच्छादयेत्पादेष्टकाभिःसंख्यांपूरयेत्।शिष्टमग्निमित्येवंद्वादशभागीयाभिःप्रच्छादयेत्।उच्छेचतुष्कोदेशात्तयोर्द्वयोःपुर
स्तात्पश्चिमविशायरूपेकाचतुरिष्टकाश्च।तस्याःपुरस्ताद्द्विरूपिका।आत्मनिद्वादशेष्टकाउदीच्योनवरीतयः।एवंविंशतिशतंचतुरश्राः
चतुर्विंशतिरर्धाः।उत्तरस्मिन्पार्श्वेनवचतुरश्राउद्धृत्यषट्त्रिंशतेदीर्घाःपादाःप्रतीरुपदध्यात्।दक्षिणस्मिन्पार्श्वेचनवैवोद्धृत्यषट्त्रिं
शतंपादाःपूर्वस्यांदिशिद्वादशभागीयानामुपांत्येउद्धृत्यद्वेद्वेचार्धेउपदध्यात्।अह्णायापापादाश्चेत्पूर्वार्धेअष्टादशचतुरश्राउद्धृत्यद्वि राम
सप्ततिपादाः।द्वेद्वेष्टकेउद्धृत्यद्वेद्वेचार्धेद्विशतएवप्रस्तारः।अपरस्मिन्प्रस्तारेअर्धादक्षिणतउदीचीरात्मन्युपदध्यात्।उत्तरतश्चदक्षिणसं ३९

पार्श्वयोर्दक्षिणत उदीचीश्चात्मनि दक्षिणतो द्वादश तथैवोत्तरतः। उभयपार्श्वयोश्चतस्रश्चतस्रः प्राच्यो रीतयः द्वात्रिंशत्। सर्वमग्निं चतुरश्रा
भिः प्रच्छादयेत् पादेष्टकाभिः संख्यां पूरयेत्। उक्तैवतस्रः स्रुत्चतुरश्राश्चात्मनि द्वादशेष्टकाः प्राच्यो नवरीतयः। ता द्वादशशतं पश्चादात्मनि
दशचतुरश्रा उद्धृत्य द्वात्रिंशतं महत्या या पादा उपदध्यात्। चतस्रश्चार्धाः दीर्घाः श्रेत्यादः पूर्वस्यां रीत्यां नवेष्टका उद्धृत्य षड्विंशतं पादा उदी
च्या उपदध्यात्। पश्चादात्मन्यष्टादश चतुरश्रा नव पादाः उदीचीरुपधाय तासामुत्तरस्मादभितो द्विपदाः सप्तार्ध्या उपधाय तासोत्तरस्माद्दक्षिणाद
र्धा उपधाय तासोत्तरस्मान्नव पादा उपदध्यात्। द्विशत एष प्रस्तारः। व्यत्यासं चिनुयाद्यावतः प्रस्तारान् चिकीर्षेत्। १३। समूह्यं चिन्वीत प
शुकाम इति विज्ञायते। समूहनमङ्गुणो नाकृतिविशेषस्तमेतमग्निं चिन्वीत पशुकामः समूह्यशब्दस्य प्रवृत्तिनिमित्तमाह। समूहनेनेष्ट
का उपदध्याति। समूहनेनैव उपधान इति। परितोऽग्निक्षेत्रमिष्टकास्थापयित्वा समूहं संपादयेन्निवा। यथा यथा बाह्याभ्येतरा उष्टका उन्न
ता भवेयुः तथा तथोपदध्यात्। अयमर्थः। यथा सर्वमग्निक्षेत्रमेतरतरुन्नतं बहिर्निनतं भवति तथा पुरीषेण कृत्वा तत्रेष्टका उपधाय
सपुरीषाभिः क्षेत्रपूरणं कुर्यादिति। द्विकचात्वाला भवतीति तेभ्यः पुरीषमध्यूहतीति विज्ञायते। द्विकचतुष्पिचात्वालाः पुरीषाणामा
कल्पाश्चात्वालवाकल्पे। द्विचैकैकं चात्वालं। शम्यया विमाय काल एव प्रकृतिवद्धनरवेदिमुपवतितिभ्यः सर्वेभ्यः पुरीषाण्याहाय चितिम
ध्यूहेयेदिति। प्राकृतान्येव विमानकरणोपधानानि। परिचाय्यं चिन्वीत ग्रामकाम इति विज्ञायते। परिचयनमङ्गुणः कृत्स्नार्थं व्याचष्टे ग्राम
ध्यमायां स्वयमातृण्णां प्रदक्षिणमिष्टकाकरणैः परिचिनोति स परिचाय्यः। तृतीयस्यां चितावाक्रमण्यादिः स्वयमातृण्णान्तमुपधाय स्वि

एपिष्टकाभिर्गणैः प्रदक्षिणं स्वयमातृण्णापरिचिनुयात्। प्रकृतानांस्थानांनांबाधकं परिचयनं एष द्विशानः। उपचाय्यं चिन्वीत ग्राममका
म इति विज्ञायते परिचाय्येनोक्तः। उपचयनमपि गुणः। उपचयनं समीपे चयनं। तान्येव विमानकरणोपधानानि। सर्वं परिचाय
वत्। अयं भेदः। आद्यस्य बहिरारभ्यतः स्वयमातृण्णासमीपे समाप्तिः। द्वितीयस्य स्वयमातृण्णासमीपस्थारभ्य बहिः समाप्तिः।
50 श्मशानचितं चिन्वीत यः कामयेत पितृलोक ऋध्नुयामिति विज्ञायते। श्मशानचितिं चिन्वीत पितृलोके ऋद्धिं कामयमानः। द्वया
नि तु खलु श्मशानानि चतुरश्राणि परिमंडलानि चतत्रयाथाकामी शाद्यार्थस्य विशायित्वात्। गतेः अस्मायतनप्रकाररूपाणि द्व
यान्यपि श्मशानानि लोके दृश्यंते। चतुरश्राणि परिमंडलानि चतुरश्रं चतुरश्रप्रकृतित्वात् चतुरश्रमेव न मंडलमिति। समास उक्तः।
चतुरश्रं शायस्य गुणशाखं समचतुरश्रं सरूवर्जं द्रोणचितोक्तः। श्मशानानि द्रोणचितिवत् कर्तव्यानि सर्वं वर्जयेत्। अन्यत्सर्वं द्रोणवत्।
विमानानि। द्वादशभागीया अध्यर्धाः अर्धाः पादाश्च। द्वादशभागीयाः सप्तविंशतिरंगुलयः प्रयोयो विंशतितिलाश्च। अध्यर्धा एक
तः ताद्दशा अन्ये एकचत्वारिंशदंगुलयः त्रयश्च तिलाः। अर्धाः पादाः एकतो द्वादशभागीयाः सदृशाः अतस्तदर्धाः पादा एकतो द्वा
दशभागीयासदृशाः। अन्योतोनवांगुलयः साधिकाश्चत्वारितिलाश्च। उपधाने प्रथमप्रस्तारे पुरस्तात् पंचाध्यर्धाः। चतुरश्राभिः
प्रच्छादनं पादाभिरर्धाभिश्च संख्यापूरणं। द्वितीये न दक्षिणतः उत्तरतश्चाध्यर्धाः। चतुरश्राभिः प्रच्छादनादिभिः पूर्ववत्। छंदश्चितं चिन्वी राम
त पशुकाम इति विज्ञायते। छंदोभिर्नाग्निभिश्चीयत इति छंदश्चित्। एतावानेव विशेषः। अन्यत्सर्वं प्रकृतिरेव। सर्वैश्छंदोभिश्चिनुयादित्येके। ५०

सर्वैर्दशतयागतैश्छंदोभिश्चिनुयात्। तानि सहस्रधा विभज्य तेषामेकैकेन भागेन एकैकामिष्टकामुपदध्यात्। यजुषां स्थाने छंदांसि भ
वेयुः। तत्र यावंतो यजुष्मत्य इष्टकास्तावंत्यश्छंदांसि तेषामेकैकेन भागेन एकैकां मिष्टकां यजुष्मतीमुपदध्यात्। लोकंपृणास्तु सर्ववेदे वा।
अथवा दशतयागतैः सर्वैश्छंदोभिर्गायत्रीभिस्त्रिष्टुभिर्जगतीभिरनुष्टुभिर्बृहतीभिरुष्णिग्भिः पंक्तिभिरक्षरपंक्तिभिर्विष्टारपंक्तिभिर्वि
ष्टाररूपाभिस्त्रेधा विभक्ताभिरिति। छंदोभिस्त्रेधा विभक्तैः सर्वाभिर्द्विपदाभिश्चतुरक्षरादारभ्य याज्ञसेनीभिर्यदुपदध्यात्। प्राकृतैरित्य
परं। प्राकृतैरग्निकांडगतैरग्निमूर्धेत्यनुवाकस्थैर्गायत्र्यादिभिर्न दशतयीभिरित्यपरं। नात्मा तत्परं विभज्य तदिति सिद्धांतितं। अत्र श्लो
काः। एकैकविधा हृद्या एकैकधा यमयः क्रमशः एकशते पटले तृतीयतद्विता त्वेषां मेदाः स्युर्धीते। प्रकृतिलिंगवत्कीनामेकविधा गस
प्तविधाः। एकविधप्रकृतित्वेन दाशस्यो न पक्षपुच्छानि। सप्तविधप्रकृतित्वे भवेतिचतेषां सपक्षपुच्छत्वं। सप्तविधप्रकृतीनां सैव भवेत्प्र
कृतिरेकशतविधात्। करणीनां द्वादशां सेरुक्ता शास्त्रतायुतैः। इष्टयुतत्पन्नरूपाभिरिष्टकाभिस्त्रिधोपधेः। त्रेधमेकविधादीनां वा उ
र्विधो सपक्षतः। एवं प्रउगयुग्मस्यत्रैधं नान्यदपेक्षतः। द्रोचक्रश्चौ प्रउगो रथचक्रद्रोणवित्समूह्यचा पर्श्वपरिचैश्चीयते। श्मशानचित्याश्छ
रश्चिते। श्येनो कंककचिदलजौ सप्तविधाः पंचपर्वदशदहनाः। प्रउगचिडमयः प्रउगो रथचक्रो द्रोणचि — शानाग्निः। एते तु पक्षपुच्छा
कूर्मचिदाद्याः परीक्षाश्च। अन्ये सपक्षपुच्छाश्च मयतक्ताः प्रवक्ष्यमाणाश्च। श्येनप्रमुखानननलान्व्याख्यास्ये पटलयोरिहोत्तरयोः। इति
करविंदकृतायां शुल्बप्रदीपिकायां चतुर्थः पटलः। श्येनचितं चिन्वीत स्वर्गकाम इति विज्ञायते। श्येनस्य त्रिविशेषः। तदाकारमग्निं वि

51

वीतस्वर्गकामः।वयसां गण एष प्रतिमया चीयत इति वयोमात्रसदृशः प्रकृतोऽग्निः।अयं तु श्येनसदृशः।कीदृशः श्येन इत्याह।वक्रपक्षो व्य
स्तपुच्छो भवति पश्चात्प्राङुदूहति पुरस्तात्प्रत्यङुदूहत्येवमिव हि वयसां मध्ये पक्षनिर्णामो भवतीति विज्ञायते।वक्रौ अन्तेषु पक्षौ यस्य स वक्र
पक्षः।व्यस्तं विस्तीर्णं पुच्छं यस्य मूलादारभ्योपर्युपरि विस्तीर्णं स्यात्पश्चात्प्राङुदूहतीति उदूहनं उन्नयनं प्रथमे पक्षार्धे मूलादारभ्य पश्चात्प्रभृ
ति प्रागुन्नयेत्।पुरस्तात्प्रत्यगुदूहति द्वितीये पक्षार्धे मध्यादारभ्य पुरस्तात्प्रभृति प्रत्यगुन्नयेत्।एवमिव हीति निपातसमुदायः प्रसिद्धौ।वय
सां मध्ये श्येनानां पक्षयोर्मध्ये निर्णामो निर्णमने निर्गत्य पक्षाभावः।विज्ञायते श्रूयते वा पक्षनिर्णाम इति वचनसामर्थ्यात्।पक्षयो
र्मध्ये इति गम्यते।यद्वा वयसां पक्षिणां मध्ये श्येनानां पक्षनिर्णामो दृश्य इति।यावानग्निः सारत्निप्रादेशः सप्तविधः संपद्यते।प्रादे
शं चतुर्थमात्मनश्चतुर्भागीयाश्चाष्टौ तासां तिस्रः शिरः इतरत्पक्षयोर्विभजेत्।प्राकृतमग्निमात्मपक्षपुच्छशिरःसु विभजेत्।को नु वि
भागानित्याह।पुच्छात्प्रादेशहीनमात्मनश्चतुष्पुरुषादेकपुरुषहीनं त्र्यष्टौ चतुर्भागीया यावति हीने तु उपधीयन्ते।तावदात्महीनं संस्कृत्यता
सां चतुर्भागीयानां तिस्रोऽग्नेः शिरः कुर्यात्।अवशिष्टं पंच चतुर्भागीयाः पुरुषं प्रादेशश्च प्राकृतयोः अध्यर्धारत्नि पुरुषयोः पक्षयोर्वि
भजेत्।द्विपदीत्यर्थः।एवं सत्यर्धदशमाश्चरत्नयश्चतुर्भागीनां गुलिष्वेकैकः पक्षः।अर्धतृतीयपुरुष आत्मा।पुरुषमात्रं पुच्छं तिस्रश्च
तुर्भागीयाः शिरः।पंचारत्निः पुरुषश्चतुररत्निर्व्यायामश्चतुर्विंशत्यंगुलयोऽरत्निः सदर्धं प्रादेश इति कॢप्तिः।पंचारत्निरग्नो पुरुषः।या राम
वान्पुरुष ऊर्ध्वबाहुस्तावान्भवतीति पुरुषप्रमाणविशेषविधिः।अन्यत्र च चतुररत्निश्चतुर्विंशत्यंगुलयोऽरत्निः तदर्धं प्रादेशः सर्वदा द ५१

शंकुलः। कृत्विराचार्यसमयः। अर्धदशमाश्चारत्नयोऽंगुलिश्चतुर्भागोनापक्षायामेः द्विपुरुषां रज्जुमभयतःपाशां करोति मध्ये ल
क्षणं पक्षस्याप्ययोः कोट्योरंतो नियम्य लक्षणेन प्राचीनमायच्छेदेवं पुरुषाः स निर्गामः। अपरेण स्पावट्टेशं संवरमवशिष्ये
त्यादित्रिमायपक्षाप्ययेषु शंकुं निहन्यात् दक्षिणोत्तरयोः रज्जानवाररत्नीन् प्रादेशमंगुलिं चतुर्भागोनां चायाममेकं कृत्वा पक्षायेशंकुं निह
न्यात्। एवमेकादशभिरंगुलीभिः प्रादेशेन च पुरुषो हीयते। तत्रार्धाष्टमाभिरंगुलिभिरेका चतुर्भागीया भवति। तदर्धेनार्धं द्विपुरु
षां द्विपुरुषायामां रज्जुमुभयतःपाशीं कृत्वा मध्ये लक्षणं कृत्वा पक्षस्यापरकोटिशंक्वोः प्रतिमुच्य लक्षणेन प्राचीनमपसार्य शंकुं नि
हन्यात्। एवं तस्यैव पूर्वयोः कोट्योः प्रतिमुच्य लक्षणेन प्राचीनमपसार्य तत्र शंकुः। एवं कृते पश्चिमपार्श्वमानाः पुरस्तात्पक्षमध्ये चतु
र्विंशत्यंगुले सार्धसप्ततिले लक्षणं निपतति। पुरतश्चैवं स निर्णामो न मनं पक्षस्य। एते नोत्तरपक्षो व्याख्यातः। अर्धदशमाइत्यादिसनि
र्णामइत्यंतेनेत्तरमपि पक्षं कुर्यात्। आत्मा द्विपुरुषायामो ऽध्यर्धपुरुषव्यासः। आत्मानं शक्वेन द्विपुरुषायाममुदक्केनाध्यर्धपु
रुषमनुपृष्ठ्यां मिनुयात्। पुच्छे ऽर्धपुरुषव्यासे पुरुषं प्रतीचीनमायच्छेत् तस्य दक्षिणतो ऽनुपुत्तरतश्चतात्वत्पक्षणायालिखेदर्धपुरुषाण घथा४
येस्यात्। शिरःस्पर्धपुरुषेण चतुरश्रं कृत्वा पूर्वस्याः करण्या अर्धार्धं त्रिवितिदक्षिणोत्तरयोर्निपातयेत्। पुच्छे पुरुषायाम्यां नितदर्धं विस्ता
राणि प्रत्यगायतानि त्रीणि चतुरश्राणि दक्षिणोत्तराणि विहृत्य दक्षिणं चतुरश्रं दक्षिणापरकोटि प्रत्यक्षणायालिखेत्। उत्तरमुत्तराप
रकोटिं प्रति। एवं कृते पुच्छमूले ऽर्धपुरुषविस्तारं मध्ये ऽध्यर्धपुरुषविस्तारे पुरुषमात्रायाम चतुरश्रं भवति। शिरःस्पर्धपुरुषेण चतुरश्र

म १

कृत्वापूर्वस्याःकरण्याअर्धान्निर्वर्तितंदक्षिणोत्तरयोर्निपातयेत्।आत्मनःपूर्वकरणीमध्येपुच्छवदर्धांपर्यग्निमात्रंचतुरश्रंकृत्वातत्पूर्वम
रणीमध्याद्दक्षिणोत्तरकरण्योर्मध्येरज्जुनिपातयेत्।शिरयोर्बहिस्त्यजेत्।अप्ययानश्शतिशोणंसावपच्छिद्यादेवमिवदक्षिणेनः।अप्य
यशब्देनआत्मपक्षपुच्छशिरसांसंधिरुच्यते।शिरसोप्ययादारभ्यापक्षाप्ययात्।पुच्छाप्ययादारभ्यापक्षाप्ययात्।एवमिवहीतिगतं।
करणेपुरुषस्यपंचमायामेषष्ठंव्यासेकारयेद्यथायोगनतंतत्प्रथमं।पुरुषस्यपंचमःचतुर्विंशत्यंगुलयएकतः।अन्यतोविंशत्यं
42 गुलयः।प्रथमंकरणंयथायोगनतंभवेत्।उपधानेयथायुज्येतथाकुर्यात्।नमनप्रकारश्चोपरितनेवक्ष्यते।प्रथमादयः।संव्यव इा ५
हारसौकर्यायातेद्वेप्राचीसंहितेतद्द्वितीयं।प्रथमकरण्येप्रागायतेदक्षिणमेकमुत्तरमेकमिति।संहितेचतुर्विंशत्यंगुलेपार्श्वमाने।
चत्वारिंशदंगुलेतिर्यङ्माने।तयोरेकानमनविधिनामध्येनिनताएकापरोन्नता।तद्द्वितीयंकरणं।प्रथमस्यषड्भागमष्टभागेन श्वे ८
वर्धयेद्यथायोगनतेतत्तृतीयं।प्रथमकरणस्यषड्भागोविंशत्यंगुलेअष्टभागेनपंचदशांगुलेनयथायोनतेनवर्धयेत्।यथाषड्भा
गःपक्षाग्रेऽधोवक्रस्यात्।अष्टभागश्चात्मागुरूपरज्जुर्भवेत्।तत्तृतीयंकरणं।चतुर्भागीयाश्चार्धान्नस्याश्चतुर्भागीयामात्रमक्ष्ण
याभिंद्यात्तच्चतुर्थं।चतुर्भागीयाएकाख्यासाध्यर्धकार्या।तस्याश्चतुर्भागीयामात्रमक्ष्णयाभिंद्यात्।एतदुक्तंभवति।पंचचत्वारिंशदं
गुला~~यांविंशत्यंगु~~लव्यासंकृत्वात्रिंशदंगुलमक्ष्णयाभिंद्यात्।एवमेकापार्श्वमानी।पंचचत्वारिंशदंगुलयएकातिर्यङ्मानी।त्रिंशदंगु राम
लयएकाक्ष्णयास्थिता।द्विचत्वारिंशदंगुलयश्चतुर्दशतिलाः।एतच्चतुर्थंकरणं।चतुर्भागीयार्धंपंचमं।त्रिंशदंगुलायामेपंचदशव्यासे। ४२

तत्पंचमं करणं । तस्याहृणया भेदः षष्ठं । पंचमम् अहृणया भेदं कृत्वा षष्ठं करणं भवति सा पादेष्टका । तस्यैकं त्रिंशदंगुलं । अन्यत् पंचदशांगुलं ।
अहृणया एकोनविंशतितिलाधिकं त्रयस्त्रिंशदंगुलं । एतत्षष्ठं करणं । ऊरुषस्य पंचमभागव्यासं प्रतीचीनमायच्छेत्तस्य दक्षिणतोन्यस्मुत्तर
तश्च तावदहृणया दक्षिणापरयोः कोट्योरालिखेत्तत्सप्तमं । चतुर्विंशत्यंगुलायामं तदर्धविस्तारं चतुरश्रं कृत्वा तस्य दक्षिणत उत्तरतश्च तावद
शं चतुरश्रे । एवं त्रीणि चतुरश्राणि कृत्वा दक्षिणोत्तरचतुरश्रे दक्षिणापरकोटिं प्रत्यालिखेत् । एवं पार्श्वमान्यौ । षड्विंशत्यंगुले अष्टाविंशति
तिलाधिके तिर्यङ्मान्यौ चतुर्विंशत्यंगुले । एतत्सप्तमं करणं । एवमन्यदुत्तरं तत्तरस्यां कोट्यां प्रत्यालिखेत्तदष्टमं । सप्तथैव त्रीणि चतुरश्रा
णि कृत्वा दक्षिणं दक्षिणापरकोटिं प्रत्यालिखेत् । उत्तरं तूत्तरापरकोटिं प्रति । एवमपि ते एव पार्श्वमान्यौ पूर्वपार्श्वं द्वादशांगुलं । पश्चिमं च
षट्त्रिंशदंगुलं यद्येवं तदष्टमं करणं । चतुर्भागीयान्यहृणयो भेदो नवमं । चतुर्भागीयाया उभयतो भेदोहृणया भवेत् । इयमपि पादेष्टका
पार्श्वमान्यावहृणयाम्ने ते एकविंशत्यंगुले सप्ततिलसहिते तिर्यग्गेकं त्रिंशदंगुलं एतं नवमं करणं । उपधानमुच्यते । उपधाने षष्टिः ष
ष्टिः पक्षयोः प्रथमा उदीचीरुपदध्यात् । उपधानकाले दक्षिणे पक्षे षष्टिः प्रथमा उदीचीरुपदध्यात् । उत्तरे च षष्टिं छांदसो विभक्तिव्यत्ययः ।
पुच्छपार्श्वयोरष्टावष्टौ षष्ठ्यः । प्रष्ठकरण्योऽष्टा अष्टावष्टौ पुच्छपार्श्वयोः । उपधानप्रकारमाह । तिस्रोग्रे तत एकां ततस्तिस्रस्तत एकां । पु
च्छपार्श्वयोरित्येव तिस्रोग्रे पुच्छस्य दक्षिणस्यामेकां प्राचीनायाविशेषात्तस्या उत्तरतो द्वे नानायोविशेषसहिते । तयोः पुरस्तादेकां वा
ह्यविशेषात्प्रागग्रां तस्याः पुरस्तात्पूर्ववत्तिस्रः । तासां पुरस्तात्पूर्ववदेकां । एवमुत्तरपार्श्वेपि । पुच्छाग्रयेचतुर्थ्यौ विशाये । अविशेषाद

स३

ए।२

त्मनि पुच्छे च समे । तस्य पश्चात्पंचम्यावनीकसहिते । तयोरपश्चाद्द्वे पंचम्यौ अर्धेष्टके । अनीकं पुच्छं तेन संहिते मे पुच्छ इव तत् । शेषे दश च चतुर्थ्यः ।
पुच्छे दश च चतुर्थकरणानि तानि तिर्यगायताः श्रोण्यंसेषु चाष्टौ प्राचीः प्रतीचीश्च श्रोण्योश्चतुर्थ्यः । एवं श्रोण्योश्चतस्रः । उत्तरपार्श्वे विपर्यस्य
कारिताः । शेषे च षड्विंशतिरष्टौ षष्ठ्यश्चतस्रः पंचम्यः । शेषे चकाराच्चतुर्थ्यो नु पज्यते । आत्मशेषे षड्विंशतिश्चतुर्थ्यः । अष्टौ च षष्ठ्यः चतस्रः
43 पंचम्यः ता एता अष्टत्रिंशत् । आसामुपधानमुच्यते । शिरः पुच्छगतविशायाश्च भागीया देशाः तेषु चतस्रः पंचम्यः तिर्यक् षष्ठ्यश्चा
ष्टौ तिर्यगेव । शिरसि चतुर्थ्यो विशये तयोश्च पूर्वस्मात्प्राच्यौ । दक्षिणोत्तरयोः प्राच्यौ तयोर्विशययोः पूर्वतः प्राच्यौ चतुर्थी च वाह्यविशि
षे । एषु द्विशतः प्रस्तारः । उपधानविधिगतदेशादिसंख्यासमुदायवशेन प्रस्तारे पंच पंच निर्नामयो द्वितीयाः । निर्नामः द्विशतः द्वयेऽसि
ष्येपि द्विशतः प्रस्तार इति वचनं प्रस्तारे द्विशततत्स्थितिकरणाय । अपरस्मिन्प्रस्तारे पंच पंच निर्नामयो द्वितीयाः । निर्नामः पक्षयोर्मध्ये च
क्रमदेश इत्युक्तं तस्मिं द्वितीयाः । दक्षिणोत्तरपक्षयोः पंच पंच निर्नामा अनुरूपमुपधेयाः । अप्ययोश्च तृतीया आत्मानमष्टभागोपेताः
पंच पंचा तृतीयकरणा वेताः पंच पंचैव । अष्टभागेन वर्धितेनात्मानमनुगताः षड्भागेन पक्षौ । शेषे पंचचत्वारिंशत्पंचचत्वारिंशदथ
माः प्राचीः प्रतीचीः दक्षिणपक्षस्य दक्षिणे भागे पंचविंशतिः । उत्तरे विंशतिः । उत्तरपक्षस्य उत्तरे भागे पंचविंशतिः । दक्षिणे विंशतिः ।
पुच्छपार्श्वयोः पंच पंच सप्तम्यः । पुच्छस्य दक्षिणपार्श्वे पंच सप्तम्यः उत्तरे पंच । प्राच्यो रीतीः । द्वितीयचतुर्थ्यावान्यतरतः संहिता मे केक्रा । राम
अनेन अन्ययोः सप्तम्यो रूपधानमुच्यते । पुच्छपार्श्वगतसप्तमीरीत्यो रन्यतरस्या रीत्या द्वितीयामति संहितामेका मन्यस्याश्चतुर्थीप्र ४३

निसंहिताचैकांसप्तमीस्तुपदश्यात्। एवंद्वादशस्सप्तम्याउपसंहिताभवंति। शेषेत्रयोदशाष्टम्यः। पुच्छशेषेष्टमकरणोत्पन्नांत्रयोदश
उदीच्यपंचरीतयः। पुच्छाग्रेपार्श्वगतयोःसप्तम्योर्मध्येपंचाष्टम्योनानायां। द्वितीयायांतिसृणांसप्तमीनांमध्येतिस्रोष्टम्यः। तृती
यायांचतिस्रः। चतुर्थरीत्यांतिसृणांसप्तमीनांमध्येएका। पंचमीरीत्यांसप्तम्योर्मध्येएका। एवंत्रयोदशोष्टम्यः। यथायोगंप्राग
ग्रः प्रत्यगग्राश्चभवेयुः। श्रेण्यंसेषुचाष्टौचतुर्थ्योर्दक्षिणाउदीचीस्था। श्रेण्यंसेषष्टौचतुर्थ्यः। श्रेणिपार्श्वतस्रः प्रत्येकं। द्वेद्वेदक्षिण
योर्दक्षिणाउत्तरयोरुत्तरा। सर्वाबाह्यविशेषा। शेषेचविंशतिः। त्रिंशत्पृष्ठएका। पंचमी। आत्मशेषेविंशतिः। चकारेणवचनाभा
वेप्रसप्तदशतद्व्यानियमशंकानिराकरणायद्विशतवचनं। व्यत्यासंचितुयाद्याद्यावतःप्रस्तारांश्चिकीर्षेत्। गतं। अथफलकानांप्र
भंजनमुच्यते। प्रथमकरणस्यविंशत्यंगुलातिर्यञ्चानीप्रज्ञ्भितेयथैकोनविंशत्यंगुलयःसाष्टादशतिलद्वयंचरज्ज्वेवस्थिता
साभवति। तथाकरणेप्रज्ञ्भयेत्वक्ष्यमाणप्रकारेण। द्वितीयस्यकरणस्यपत्तनमनीचतुर्विंशत्यंगुलासार्धसप्ततिलातस्याष्ट
मोभागःष्टतस्रोंगुलयःसपादतिलश्चातेनद्वितीयकरणस्यदीर्घतयाचत्वारिंशदंगुलयोःफलकयोर्मध्येचविंशत्यंगुलेएकस्मि
न्निनतिमेकस्मिन्नुन्नतिंचकुर्यात्। यथातस्यभागद्वयंमेकैकशःपूर्वकरणसदृशंभवति। तथेतितृतीयस्यतुषष्ठाष्टमभागसं
धीनमनं। नमनं षष्ठंभागंपूर्ववन्नमयेत्। अष्टमस्यतुनमनंमात्मानुरूपमृज्ज्वस्थानमेवतस्मिन्नमनेषष्ठापेक्षया। तत्रश्लोकाः।
श्येनेप्रथमश्चाद्यस्यकरणस्यप्रजृंभनं। द्वितीयस्यतृतीयस्यचोच्यतेफलका। नतिः। अस्मिन्नेतादिमस्यकरणस्यप्रजृंभनं। पुच्छस

पक्षकरणीपृष्ठस्यासौयथार्जवः।द्वितीयस्यतृतीयस्यपक्षकानीगतेफलं।व्यासस्यपक्षकरणीपृष्ठतोनाहिमेनतिः।एकोनविंशतं
तुल्यःसाष्टांशंचतिलद्वयी।तिर्यङ्मानीयदास्यास्यात्तथारज्ज्वापृष्ठं भयेत्।सपादतिलसंयुक्तचतुरंगुलिमात्रकः।पक्षस्यनमनी
पृष्ठस्तेनस्यात्फलकानतिः।एवंद्वितीयश्येनोक्तंमार्गेणोन्नीयभंजनं।करणस्यविधातव्यंफलकानमनंतथा।इतिश्रीकरविं
44 दस्वामिकृतायांशुल्वप्रदीपिकायांपंचमःपटलः।श्येनचितेचिन्वीतसुवर्गकामइतिविज्ञायतेवक्रपक्षोव्यस्तपुच्छोभवतिपश्चा
त्प्राङुदूहति।पुरस्तात्प्रत्यङुदूहत्येवमिवहिवयसांमध्येपक्षनिर्नामोभवतीतिविज्ञायते।गतं।द्वितीयश्येनस्तुपरिष्ठसेवकृतिः
पुनरपिपठिता।तत्रविशेषमाह।पुरुषस्यषोडशीभिर्विंशंशतंसारत्निप्रादेशःसप्तविधःसंपद्यतेसोचत्वारिंशदात्मनि
तिस्रःशिरसिपंचदशपुच्छेएकत्रिंशद्दक्षिणेपक्षेतथोत्तरे।षोडशिषोडशभागमिता।ताभिःषोडशीभिःसारत्निप्रादेशःस
प्तविधोग्नेर्विंशंशतंसंपद्यते।तथाहि।सप्तस्थापयित्वाषोडशिभिर्गुणितेद्वादशोत्तरंशतंभवति।अर्धषोडशित्रिर्गुणितेष्टौति
ष्टष्टसुक्षिप्तेषुविंशत्युत्तरंशतंषोडश्योभवंति।तासांचत्वारिंशदात्मनिचत्वारिंशत्षोडशिपरिमितानिक्षेत्राणिआत्मेत्यर्थः।
तिस्रःशिरसिषोडश्यःस्युः।पंचदशपुच्छेपंचदशषोडश्यःपुच्छक्षेत्रं।एकत्रिंशद्दक्षिणेपक्षेतथोत्तरेपक्षेएकत्रिंशत्षोडशिक्षे
त्रेदक्षिणेपक्षेउत्तरतश्च।विमानमाह।अध्यर्धपुरुषस्तिर्यग्द्वावायामतइतिदीर्घचतुरश्रंविहृत्यश्रोण्यंसेभ्योद्वेद्वेषोडश्यौनि राम
रस्येच्चत्वारिंशत्परिशिष्यंतेसप्तात्मा।अनुपृष्ठ्यंचत्वारिंशद्द्विशतेवांगुलान्यायामः।विस्तारोशीतिशतमंगुल्यस्तिर्यक्।एवंदीर्घच ४४

उरश्रं विहृत्य श्रोण्यंसे षड्विंश पुरुषप्रमाणानि चतुरश्राणि प्रमाणीकृत्वा तान्यात्मपार्श्वमाभी निष्टकोणे तिर्यग्यानी निष्टकोणाश्वत्य
त्नायालिखेत्। लेखानां दहिर्भूतानां न्यजेत्। चत्वारिंशद्वशिष्यंते। आयामतो षष्ठो षोडशपः। तिर्यक्कृषट्। अष्टौ षड्गुणिता अष्टचत्वारिंशत्।
श्रोण्यंसेभ्यो द्वे द्वे निरस्य षड्शेषे निरस्या भवंति। शिष्टाश्चत्वारिंशदात्मनि भवंति। शिरस्यर्धपुरुषेण चतुरश्रं कृत्वा पूर्वस्यां करण्यामर्धा
त्नाव निर्हृत्य दक्षिणोत्तरयोर्निपातयेत्। त्रिस्रः परिशिष्यंते तच्छिरः। तं प्रदेशमात्मनोंसयोः पुरतः पुष्ट्यायामर्धपुरुषेण चतुरश्रं कृत्वा पूर्वस्याः
करण्यङ्गुल्याऽतिकृते तिस्रः परिशिष्यंते तच्छिरो भवति। पुरुषस्तिर्यङ्मात्रायामतः षोडशभागश्च दक्षिणपक्षस्योत्तरः। पुरुषमात्रं ति
र्यक्प्रायायामो द्विपुरुषमात्रमर्धाष्टमाङ्गुलयश्च। एवं दक्षिणपक्षे दीर्घचतुरश्रं कृत्वा। तथोत्तरेऽपि पक्षाग्रे पुरुषचतुर्थेन चत्वारि चतुर
श्राणि कृत्वा तान्यपहाय आलिख्यार्धानि निरस्येदेकत्रिंशतं परिशिष्यंते। पक्षस्याग्रे पुरुषचतुर्थेन त्रिंशदङ्गुलेन चत्वारि चतुरश्रा
णि कृत्वा तानि प्रत्येकं दक्षिणाप्रत्यक्कृत्यवलिख्य पूर्वार्धानि निरस्येत्। एवमेकत्रिंशत्षोडशपः परिशिष्यंते सदक्षिणः पक्षः। पक्षे
द्वात्रिंशत्षोडशपः षोडशभागश्चैकः। तासु त्रयस्त्रिंशत्। तासु यश्चार्धं पूर्वार्धेषु निरस्येत्। एकत्रिंशत्परिशिष्यंते। एवमेवोत्तरः पक्षः। तत्र चतुरश्रा
ण्युत्तराः प्रत्यगहणया आविलिख्य पूर्वार्धानि निरस्येत्। पक्षाग्रस्य स्रज्य मध्ये पक्षस्य प्राचीं लेखामालिखेत्। पक्षाग्रे पुरुषनियम्य ले
खायोः पुरुषांते निनीतोदं कुर्यात्। निनीतोदान्प्राचीनं पुरुषांते निनीतोदं निनीतोदयोर्नीनां तावालिखेत्। तत्पक्षनमनं। पक्षाग्रमस्रज्य त्रिंशदङ्गु
लमपहत्य मध्ये पक्षस्य प्राचीं लेखामालिखेत्। पक्षाग्रमस्रज्य शेषः पक्षोऽर्धतृतीयाङ्गुलोनविंशत्यधिकशतद्वयाङ्गुलं। तस्य मध्ये स

पादांगुलोनदशाधिकशतांगुलेपश्चाद्दारभ्यप्रागायतांलेखांप्रदक्षिणमतीत्यायाम्यांलिखेत्।पश्चिमेपक्षाग्र्येपुरुषमात्रेवेशंकुंनिधायनिय
म्यापरंवेष्टनेनदक्षिणाप्राक्कुलेखांशीमिपातयेत्।सपश्चिमपक्षांतात्प्राक्पंचाशदंगुलेपंचविंशतितिलाधिकेनिपततितत्रनि
तोदंडिंडंकुर्यात्।तस्माच्चप्राचीनलेखायामेवपुरुषमात्रेद्वितीयांनितोदंकुर्यात्।नितोदयोरारभ्यपक्षांताग्रतिनानापृथक्त्वेलिखि
45 तापश्चिमौ।नितोदादारभ्यपश्चिमपक्षाग्रंपक्षाप्ययंवप्रत्यगालिखेत्।पूर्वस्मान्नितोदादारभ्यपूर्वपक्षाग्रंपक्षाप्ययंवप्रत्यगालिखे
त्।तत्पक्षनमनं।तदेतत्पक्षस्यनमनंभवति।एतेनोत्तरःपक्षोव्याख्यातः।रज्जुः१८।द्विपुरुषंपश्चाद्दैर्घ्यपुरुषंपुरस्ताच्चतुर्भागोनःपु
रुषश्चायामोऽष्टादशाकरण्योपार्श्वयोस्ताःपंचदशपरिगृह्णीततत्पुच्छं।पुच्छस्यायंद्विपुरुषप्रमाणो।तस्यमूलंमर्धपुरुषमानंश्चाया
मश्चभागोनःपुरुषःअष्टादशाकरण्योपार्श्वयोः।अष्टादशकरोतीत्यष्टादशाकरणी।षोडशीनांप्रकृतत्वात्।तासामष्टादशानांक
रणीतेखलुत्रिषोडशप्रमाणवत्यंगुलसमचतुरश्रस्याक्ष्णयाभूतो।तथाहि।पुच्छमूलाद्दक्षिणतउत्तरतश्चपार्श्वमानीतिर्यङ्मानी
चतुर्भागोनःपुरुषप्रमाणोपेताःत्रिभिर्नवेतिनवषोडशांशैत्रस्याक्ष्णयारज्जुद्विस्तावतींभूमिंकरोतीतितेअष्टादशकरण्योपा
र्श्वमान्योपंचदशषोडशीःपरिगृह्णीततत्पुच्छं।पुच्छसंज्ञंभवति।करणान्युच्यन्ते।षोडशीचतुर्भिःपरिगृह्णीयादष्टमेनत्रिभिरष्टमे
श्चतुर्थेनचतुर्थविशेषेणेति।चतुष्प्रकारैफलकैःषोडशीपरिगृह्णीयात्संपाद्येयत्।अष्टमेनप्रकृतत्वात्पुरुषस्यपंचदशांगुलेनेति। राम
यावत्त्रिभिरष्टमैःपंचचत्वारिंशदंगुलेन।चतुर्थेनत्रिंशदंगुलेन।चतुर्थसावशेषेणद्विचत्वारिंशदंगुलेनसार्धचतुर्दशतिलाधिकेन ४५

दक्षिणयावस्थितेन इति शब्दार्थौ। एतेन चैतेन चेति। अष्टमत्रिरष्टम्यौ पार्श्वमान्यौ। चतुर्थतस्सविशेषौ तिर्यङ्मान्यौ। चतुर्थस्यैव सवि
शेषप्राप्त्यर्थं चतुर्थशब्दः। अर्धेष्टकां त्रिभिर्द्वाभ्यां चतुर्थाभ्यां चतुर्थसविशेषेणेति परिगृह्णीयादिति शेषः। अर्धेष्टकां त्रिभिः पार्श्वगृह्णी
यात्। त्रिंशदंगुलाभ्यां द्विचत्वारिंशदंगुलेन सचतुर्दशतिलेन च त्रिभिः फलकैः। पादेष्टकां त्रिभिश्चतुर्थेनैकं चतुर्थसविशेषाद्वा
भ्यां वेति। एकविंशत्यंगुलाभ्यां ससप्ततिलाभ्यां त्रिंशदंगुलेन चैकेन चेति त्रिभिः। पद्मेष्टकां चतुर्भिर्द्वाभ्यां चतुर्थाभ्यां सप्तमाभ्यां
वेति। त्रिंशदंगुलाभ्यां सप्तदशांगुलाभ्यां पंचतिलाधिकाभ्यां वेति पद्मेष्टकां द्वाभ्यां चतुर्थाभ्यां सप्तमाभ्यां च कारयेत्। पद्ममध्यीयां च
तुर्भिर्द्वाभ्यां चतुर्थाभ्यां द्विसप्तमाभ्यां चेति। पद्ममध्ययोग्या पद्ममध्यीयां त्रिंशदंगुलाभ्यां चतुस्त्रिंशदंगुलाभ्यां दशतिलाधिकाभ्यां
वेति। ~~मध्यमध्य~~ चतुर्भिः। पद्माग्रीयां त्रिभिश्चतुर्थेनैकं चतुर्थसप्तमाभ्यामेकं चतुर्थविशेषसप्तमाभ्यां चेति। पद्माग्रयोग्या पद्माग्रीयां त्रिं
शदंगुलेनैकं। पंचतिलाधिकं सप्तचत्वारिंशदंगुलेनैकं। तथैकोनविंशतितिलाधिकेनैकोनषष्ठ्यंगुलेनैकं। इति त्रिभिः परिगृह्णी
यात्। एवं षट्करणान्युक्तानि पद्मेष्टकाः पद्ममध्यीयाः पद्माग्रीया इति तद्ग्रयाणां तत्र तत्रोपधाने योग्यत्वाय हेतुः समत्वाय च वक्रताको
र्यत्वाह। पद्मकरण्याः सप्तमं तिर्यङ्मानी उरुषचतुर्थं च पार्श्वमानी तस्या दक्षिणया रज्ज्वा करणीं प्रज्ज्वभयेत् पद्मनमन्याः सप्तमेन फलको
निनमयेत्। प्राथम्यसामर्थ्याच्च पद्मेष्टकाकरणी विषयमिदं। लेखाया विभक्तस्य पद्मार्धस्य करणी पद्मकरणी सा सपादांगुलोनदश
शतांगुला। तस्याः सप्तमे साष्टादशतिलपंचदशांगुले रज्ज्वावस्थितासा प्रजंभ्यमानस्य यथा तिर्यङ्मानी भवति तथा तत्करणी रज्ज्वाहा।

46

याप्रज्ञ भयेत्। पार्श्वमानी उप्रज्ञं भ्यमानेपि करणे ऊरूपचतुर्थमेव प्रज्ञं भिकात्रापि मानार्थः। एतदुक्तं भवति। करणस्यैकस्या कोट्यां रज्जु
प्रबुध्यतो कोटिमितरां कोटिं प्रति श्रहणया बलेन कर्षयेत्। यथा कर्षणे कृते द्वयोः कोट्योः सन्निकर्षेण पार्श्वमान्योरन्यतरां तरालमङ्गु
लेन पत्रकरण्याः सप्तमं भवति तथा प्रज्ञ भयेत्। तिर्यग्मान्योरंतराले मृज्जुवस्थितमपि ऊरूपचतुर्थमेवानेन तिर्यग्मान्याः क्रासः क्रि
यते। वकृत्वाय द्वे त्रसाम्याय चाश्रथवा साष्टादशा तिलीपंचदशांगुलां तिर्यग्मानी कृत्वा त्रिंशदंगुलं पार्श्वमानी च कृता मध्या चतुरश्रे वि
हत्य तस्या हृणया रज्वा पत्रेष्टकाकरणे प्रज्ञं भयेत्। करणस्यैका कोटिः। यथैतद्दृणया रज्जुः समं भवति तथा नमयेदित्यर्थः। एवं कृ
ते थ्यर्धांगुले नैका कोटिर्दीर्घायसी भवति। व्याख्या द्वितीयायेः केचिदुक्ता नो जन्यभागिनी पत्रेष्टकाकरणस्य नमनविधिमन्त्रा
पत्रमध्वीया पत्राग्रीया करणयोर्नमनमुच्यते। यथा यामात्रया पत्रो नम्यते सा पत्रनमनी। सा च पत्रमध्यलेखयोः प्रथमनितोद
त्यश्चिममात्रा सा च पंचविंशति तिलाधिकां पंचाशदंगुलेन्मुक्ता तस्याः सप्तमे साष्टतिले सप्तांगुले तेन फलकानि पत्रमध्वीया पत्रा
ग्रीया करणयोर्दीर्घानि फलकानि तानि नमयेत्। अयमर्थः। यथा मध्ये कृत मनेन पत्रमध्वीया भागद्वयं पत्रकरण्याः सप्तमं तिर्यग्मा
नी ऊरूपचतुर्थं च पार्श्वमानीस्थक्तं प्रकारं भवति। यथा द्विसप्तफलकं योर्मध्ये सप्तममात्रे पत्रनमन्याः सप्तमेन एकस्मिन्फलके नि
नतिमेकस्मिन्नुन्नतिं च कुर्यात्। तत्र श्लोकः। पत्रेष्टकायाः करणे तथा रज्वा प्रज्ञ भयेत्। तस्य तिर्यग्यथा पत्रकरण्याः सप्तमं भवेत्। राम ४६
पत्रमध्वीयाकरणे द्राघीयः फलकद्वये नमनी सप्तमेन स्यान्नतिः सप्तममात्रको। पत्राग्रीयाकरणस्याप्येषैव नमनक्रिया सप्तमेंशे

नतिम्नस्य भागोनेन्पो भवेद्दृजुः। साष्टादशानि लं तिर्यक्त्वयथा पंचदशांगुलं। भागानामिष्टकानां च तदा स्थानमनक्रिया। आद्ये
शेपेने चाष्टिमस्य करणस्य पञ्जं भवेत्। षष्ठषष्ठपञ्चकरणीषष्ठव्यासो यभवेत्। द्वितीयस्य तृतीयस्य च षष्ठानां नेतः फली। व्यासस्य पञ्च
करणीषष्ठतानाष्टमेनतिः। आद्यशेपेन विषय मिद्दनते केवलं। पञ्चेष्टकाश्चतस्रोत्र षड्द्व पादेष्टका अपि चोड्डानाक सदृर्धाश्च जानो
र्द्धमकारिताः॥ उपधाने चतस्रः पादेष्टकाः उरस्ताच्छिरसि। उपधानकाले चतस्रः पादेष्टकाः शिरसः पूर्वभागे उरस्तादुपदध्या
त्। तासा चतस्रणो मकाउरस्ताद्वाद्य विशेषाः प्रागग्राः ततः पश्चात्त्रिस्रः तासु मध्यमा प्रत्यगग्राः। अपरेण शिरसोप्ययेपंच। शिरसो
प्ययस्य परतः पंच प्रत्यगग्रे द्वे। आ उच्छात्यादाप्ययेइत्येवं पूर्वेण पक्षाप्ययोः उरतः आत्मन्येकादश। पंच प्रत्यगग्राः। अपरेणैकाद
श। पश्चिपक्षाप्यययोः पश्चादेकादशषट् प्रत्यगग्राः। पूर्वेणोच्छाप्ययंपंच। उच्छाप्ययस्य उरतः तासु प्रत्यगग्रास्त्रिस्रः। अपरेण पंच। उच्छा
प्ययस्यापरतः पंच तासु प्रत्यगग्रे द्वे। पंचदश उच्छाग्रे। उपधेयाः तासु सप्त प्रत्यगग्राः। ताएताः षट्पंचाशत्पादाः। १ए चतस्रः श्चतस्रः
पक्षाग्रीयाः। प्रत्येकं चतस्रः। पक्षाप्ययषोश्च विशयाः। चकारेण पक्षाग्रीया अनुकृष्यंते। पक्षाप्ययोश्चतस्रश्चतस्रः विशयास्तुः। सप्तमे
नपक्षयोः शेरते। अवशिष्टेनात्मनि। ता आत्मनि चतस्रभिश्चतस्रभिः षोडशीभिर्यथायोगमुपदध्यात्। आत्मप्रविष्टपक्षाग्यानप
रितश्चतस्रभिश्चतस्रभिः षोडशीभिर्यथायोगं युज्यंते तथा पदध्यात्। षोडश्यः पक्षाग्रीयाश्च विशेषसहिता भवेयुरित्यर्थः। चतस्र
श्चतस्रः पक्षमध्यीयाः पक्षमध्ययोः। यथायोगमित्येव। पक्षेष्टकाभिः पक्षौ प्रच्छादयेत्। यथायोगमित्येव। चत्वारिंशता चत्वारिंशता पक्षे

47

इष्टकाभिः प्रागायताभिः पञ्चभिः प्रच्छादयेत् । अथ शिष्टं षोडशीभिः प्रच्छादयेत् । उत्तमध्ये द्वे रीत्यौ । पूर्वा चतुरिष्टका [redacted] अपराध
ष्टु द्वे द्वे विशेषसंहितास्थानं । एता एव दश । आत्ममध्ये तिस्रो रीतयः प्राच्यः चतुरिष्टकाः । आत्मन्येव पश्चादुरस्याद्वेरीयौ द्वे रीत्यौ चतुश्च
तुरिष्टकेता विंशतीः । शिरसि द्वे षोडश्यौ । अन्या बाह्यविशेषा अन्यत्र शिरस्यः । अंते षेयाग्रंत्याः । पुच्छे चतस्रः बाह्यविशेषाः । नवात्र सं
ख्यापूरणं । संख्यायाः स्थाने च द्विशतविनियोगात् । तथाहि षड्पंचाशत्पादाः । अष्टौ चाष्टौ पक्षायीयाः । चत्वारिंशत्पक्षे इष्टकाः । अष्टौ
पक्षपध्यायाः । चत्वारिंशात्षोडश्यः । एवं द्विशतः । अपरस्मिन्प्रस्तारे उरस्याच्छिरसि द्वे षोडश्यौ बाह्यविशेषे उपदध्यात् । द्विशतप्रस्तारे
सिरस पूर्वभागे प्रागग्रे बाह्यविशेषे द्वे षोडश्यौ । तिस्र अपरेण द्वे विशये अभ्यंतरविशेषा । तयोः षोडश्योः पश्चात्प्रागग्रे शिरस्यर्धे पादेष्टका
मात्रे शेषेणात्मनि एवं विशये द्वे षोडश्यौ अंतर्विशेषा । द्वाभ्यां मर्धेष्टकाभ्यां यथायोगमुपदध्यात् । तिइत्येवं ते विशये इष्टके द्वाभ्याम
र्धेष्टकाभ्यां विशयाभ्यां यथायोगं परिगृह्णीयात् षोडश्योरर्धेष्टकयोश्च यथा विशेषाः संमिता भवेयुस्तथोपदध्यादित्यर्थः । बाह्य
विशेषाभ्यां परिगृह्णीयात् । तिइत्येवं ते एव षोडश्यौ बाह्यविशेषाभ्यां मन्याभ्यामर्धाभ्यां परिगृह्णीयात् । एते अर्धे शिरस्य नवकाशादा
त्मनि भवतः । एतदुक्तं भवति । विशयषोडश्योः उरस्याद्विशयभूते बहिर्विशेषे द्वे अर्धे तदात्मनि विशयषोडश्योर्द्वे तिर्यगतः उत्तरतश्च
बहिर्विशेषे अन्ये अर्धे इति । आत्मकरणीनां सेधि बुषोडश्यौ बाह्यविशेषा उपदध्यात् । आत्मनः करणः आत्मकरणः । तासां सं
धिषु श्रोण्यंसेषु षोडश्यः चतस्रः । छांदसो विभक्तिव्यत्ययः । आत्मनि पक्षाप्ययोः समीपेषु बाह्यविशेषा अतस्रः । षोडशीरुपदध्या

राम
४७

तासां त्यावाह्यविशेषाः इति वक्ष्यमाणबाह्यविशेषग्रहणं संख्यापूरणाय पादानामर्धानां चतुष्पादानार्धषोडशीनामुद्धरणप्रसंगेऽ
सामुद्धरणे माभूदित्येवमर्थं । चतस्रश्चतस्रोऽर्धेष्टकाः पक्षाग्रयोः । प्रतिपक्षं चतस्रः चतस्रः अर्धेष्टका बाह्यविशेषा इत्येवा पक्षेष्टकाभिरुदी
चीभिः पक्षौ प्रच्छादयेत् । पक्षयोरुदीच्यः पक्षेष्टकाः सप्तरीतयः । स्त्रिस्रः स्त्रिस्रोऽर्धेष्टकाः पुच्छपार्श्वयोः । बाह्यविशेषा एव । अवशिष्टं षोड
शाभिः प्रच्छादयेत् । अवशिष्टमात्मनि त्रयस्त्रिंशत् षोडशिस्थानं । पुच्छे द्वादश षोडशिस्थानं । अंत्या बाह्यविशेषा अन्यत्र पुच्छात् । अंत्या
सर्वा बाह्यविशेषा भवेयुः । पुच्छादन्यत्रा पुच्छे त्वंत्याः षोडश्यो ऽभ्यन्तरविशेषा एव । एवं त्वेतत्पूरणं कृत्वा प्रकृतितः प्राप्तसंख्यापूरणमेव
कर्तव्यमित्याह । चतुरश्रं त्र्यश्रं वा संपद्येतार्धेष्टकाभिः पादेष्टकाभिर्वा प्रच्छादयेत् । एवं षोडशिभिः प्रच्छाद्यमाने संख्यापूरणाय का
सुविडष्टनासु चयनेष्वेवं चतुरश्रं त्र्यश्रं वा संभवेत् । तत्तत्रार्धेष्टकाभिः पादेष्टकाभिर्वा प्रच्छादयेत् । संख्यापूरयेदित्यर्थः । ननु प्रच्छा
दयेदिति वचनेन संख्यापूरणं कथमुच्यते । उच्यते । तत्र द्वयोः प्रच्छादनविधानं तरं संख्यापूरयेदिति विधिः । इहत्वषोडशीभिः प्रच्छा
दिते संख्याया असमाप्तेः तत्पूरणापेक्षया द्वितीयप्रच्छादनेऽवचनेऽपि संख्यापूरणमेव गम्यते । किंच । चतुरश्रा मे ये पंचदशभागीयाभि
रर्धाभिश्च संख्यापूरिता द्वितीयपादाऽप्येकाषड्भागीयाभिः पूरिता । न हि द्वाविपादा अर्धाऽप्येकाश्च विकृताः संति तस्मात्पादार्धानध्य
र्धान्षोडशीभिश्च यथायोगं संख्यापूरणं गम्यते । किंच । संख्यापूरणस्यान्याय्यत्वात् द्वे पदिष्टत्वाभिरन्याभिः संख्यापूरणाशंकेः
पादाभिरर्धाभिश्च सुकरत्वात्ताभिरेव संख्यापूरणं युक्ततरं । अतः प्रच्छादिताः सुकाश्चिदुत्पादार्धषोडशीभिर्यथायोगं यावत् संख्या
मुपधेयाः इति । अथैकाः पंचदशभागीयानां स्थाने परिभाषेयं । पंचदशभागीयाः प्रथमचतुरश्रयुक्ताः । तासां स्थाने कार्याः संख्यापू

रणेश्च एकाभवेयुः। अस्याः परिभाषायाः अत्रोपदेशः कथं इहोपदिष्टाः षोडश्योपि तत्रसाम्यादेकशब्देन ग्राह्या इत्येवमर्थं। तेनत्र
एकाभिः चतुरश्रैमौ संख्यापूरणं। इहतु षोडशीभिश्चेति सिद्धं। केचिद्यद्यतुरश्रं आश्रिवासंपद्येतेत्येतदपि परिभाषाभिर्द्धंतितेन
तत्रामोतदपेक्षायांताभिरपि संख्यापूरणमन्यंते। अत्रपुनः पश्चाद्ये इति वचनं पश्चाद्देनेपिच एताययथाभवेदित्येवमर्थं। तेनतत्र
ग्रामोसतिसंभवेसत्यांचापेक्षायांताभिः सहएभिरभिपश्चाद्दनंस्यात्। उपधानक्रमः। द्वितीयचित्यां शिरसि शाखामुखेवाह्यविशेषैर्द्वे
48 षोडश्यो। तयोः पश्चात्साखामुखेवाह्यविशेषविशयेद्वे। अर्धेतयोः पश्चाद्विशेषविशिष्टविषयद्वेषोडश्यो विशयेश्चात्मनितयोर्दक्षिण
तदुत्तरतश्चबाह्यविशेषानेकैकमर्धं। ततः पश्चादात्मनि प्राच्यः षड् इत्ययः। तत्रदक्षिणस्यांरीत्यांपूर्वस्माद्बाह्यविशेषाः प्रागग्रैका
षोडशीपश्चाच्चबाह्यविशेषाप्रत्यगग्रैका। तयोर्मध्ये षडर्धाः त्रिस्रः प्राच्यः त्रिस्रः प्रतीच्यः तिस्रउदीच्यः। द्वितीयरीत्यांपश्चाद्बाह्यविशे
द्वेऽर्धे। तत्पूर्वस्मादर्धविशेषयुक्तविशेषाप्रत्यङ्मुखैकाषोडशी। तासांपूर्वस्मात्षडर्धास्त्रिस्रः प्राच्यः प्रतीच्यश्च। तत्पूर्वस्मादुत्तरतोविशे
षाप्रागग्रैकाषोडशी। तत्पूर्वस्मान्नद्विशेषविशिष्टविशेषमर्धं। तत्पूर्वस्मा त्सर्वपक्षिप्रमर्धमस्येव। तृतीयरीत्यां शिरोण्ययषोडश्यः
पश्चादापुच्छाप्ययमष्टौषोडश्यः चतस्रः प्राच्यः चतस्रः प्रतीच्यः। एवमेवोत्तरास्विस्रोरीतयः। तृतीयाचचतुर्थी। द्वितीयावत्पंचमी। प्र
थमावत्षष्ठी। तत्रतिसृणांदक्षिणरीतीनांदक्षिणपार्श्वमुत्तरेपार्श्वेदक्षिणानामुत्तराणांचदक्षिणेपार्श्वेरातिगताश्वप्रतीच्योमका
लाधिकाः तत्प्रतीचमुखाः प्राच्यएवैशोभांवितन्वते। पुच्छेमध्यरीत्यांतयोर्विशयषोडश्योदक्षिणतदुत्तरतश्चद्वेअर्धेबाह्यविशेषतः प राम ४८
श्चान्मध्येद्वेषोडश्योतेऽश्रमितः त्रिस्रः त्रिस्रोऽर्धाः इत्यष्टेष्टकाः। ततः पुच्छाग्रेषड्भिः षोडशीभिरभितोऽर्धाभिरष्टेष्टकाः सप्तरीतयः। ताः द्वा

दशशतमिष्टकाः पादेष्टकाभिश्चपूरणपक्षेताएवरीतयः। तत्रविशेषः। पुच्छगतोपांत्यरीत्यांबाह्याश्चतस्रोर्धाद्विधाकुर्यात्। आत्मनि
प्रथमद्वितीयपंचमषष्ठेषुतन्मध्यगतार्धेषुपश्चिमतोद्वेद्वेअर्धे। अवशिष्टांन्येषुअर्धस्थानेषुषोडशीप्रमाणान्युपदध्यात्। द्वितीयापंच
मेया ---------- पाश्वार्धेद्विधाभिंद्यात्। नतुभिदोवर्जनीयइति। तत्रतत्राभेदोयत्नेनपरिहृतं। सइदानींपुच्छेप्राउर्ध्वभूमिषितिनिनं
निपातलोकानांअसंबाधेनसमुदिताभिरिष्टकाभिःसंख्यायापूरितायां। यदिष्टकेकभेदउपजायतेसभेदोमर्षणीयः। अवच
नादेकभेदेदेशस्यअतएवभेदवर्जनस्यसर्वकंगछन्निराचार्यस्यदिशतएषः। व्यत्यासेचितुयायावतःप्रस्तारांश्चिकीर्षेत्। गतो। श्
कंकचिदलजचितिश्येनचित्याव्याख्याते। कंकदलजोपत्रिविशेषो। कंकइत्याचीयतेअलजइत्याचीयतइतिकंकचिदलजचितौ
श्येनचिताव्याख्यातौ। तयोर्हिमानेकाकारणेप्रधानानिश्येनस्येवकर्याणीत्यर्थः। मुख्यत्वात्सर्वश्येनेनेतिकेचित्। आनंत
र्यात्द्वितीयश्येनेनेति। अन्योयविशेषाइभाभ्यामित्यपरे। उक्तश्येनस्वरूपमनुभाषते। अत्रैवशिरसोभावप्रतिपादनार्थं। ए
वमिवहिश्येनस्यवर्षीयांसोपक्षौपुच्छादक्रौसंन्नतपुच्छेदीर्घआत्मामंडनशिरश्चतस्मात्श्रुतिसामर्थ्यात्। एवमिवहि। गतौ। श्येन
स्यवर्षीयांसोहीर्वतरोपुच्छाढक्रौपक्षौसन्नतेपुच्छंआत्मसमीपेह्रसीयः अग्रेव्यंसंदीर्घआत्मानसमचतुरश्रः अमंडलः। नापिमंडला
काराः इत्यन्मंडलःनवाशिरश्चविद्यते। तत्रापिमंडलंनापिसमचतुरश्रमेवद्विश्येनोलोकेदृश्यते एतावदेवश्येनस्यादृश्यमनेः
कुतः श्रुतिसामर्थ्यात्। सामर्थ्यमभिधानशक्तिः। एतावदेवश्येनशब्देनाभिधीयते। यदेतदुक्तपक्षतात्र्यपुच्छतादीर्घात्मनामे

49

उलतासशिरस्कतावत्स्मात्केकालजावपितदाकारौचतव्याविति। अशिरस्कावानाम्नानात्। अशिरस्कोवाश्येनः अनाम्नानात्न
हिंपक्षपुच्छात्मगतवक्रतावद्दिवच्छिरसश्चाम्नानमस्ति। श्येनविधानसामर्थ्यात्। शिरसोविधानमस्तीतिगम्यतइति। केचित्तुयसौवा
रक्षप्रतिमयाचीयतइतिप्रकृतावपिपक्षाद्दिवच्छिरोविधानं। प्रसज्येतानैषदोषः। तत्रहिपक्षपुच्छविधानंपरिसंख्यानार्थं। तद्यथा
पिचतच्चोत्काग्रतमेवेति। तस्मात्सशिरस्कश्येनः। किंचविज्ञायतेच— —रइयंवकंकचितंशीर्षएवंनचिन्वीतेतियदिबोधकपाण्या
कंकेशिरोविद्यतेतत्कथंस्याद्ब्राह्मणेकंकचितंशीर्षएवंतमितिब्रूयात्एवेत्यर्थः। तस्माद्शिरस्कःश्येनः। कंकेशिरोविधानात्। त
थावयोमात्रसादृश्येप्रकृतेप्राप्तेश्येनप्राप्तिविधानसामर्थ्यादेवश्येनेशिरोप्यस्तीतिगम्यते। ननुत्रिहितो। अग्नेशिरइत्यादिशिरस्उप
धानदर्शनाच्च। अतस्तयोर्विकल्पइतिमन्वानोवाशङ्कते। तत्रोक्तंश्येनोलजइतिसंकल्पमात्रभेदः। नाकावेदाह्लायणायज्ञादिवत्
अशिरस्कःश्येनइत्युच्यते। प्राकृतोवक्रोपक्षौसंनतंपुच्छंविकारश्रवणाद्यथाप्रकृत्यात्मा। विकारात्प्रकृतिरेवपक्षौवक्रौपुच्छात्संनतं
वक्रपक्षोव्यस्तपुच्छइतिविकारश्रवणात्। आत्मातुयथाप्रकृत्या। यद्वा। यथाप्रकृतिःअविकृतःसमचतुरश्रःचतुःपुरुषइत्यर्थः। अ
विकारंनविकारंकथ्यन्ते। पक्षपुच्छेषुविकारग्रहणंनात्मनितस्मात्सतएवात्माअरत्निनार्धप्रादेशेनचैकैकंपक्षंवर्धयित्वा। यद्यपिप्रा
कृतौपक्षावित्युक्तं। तथापिपुच्छस्याप्राकृतश्रवणादुक्तप्रकाराःपुरुषमात्रतागम्यते। तस्मात्पुच्छात्प्रादेशमुपधायपक्षौविभजेदिति राम
केचिन्मन्यन्ते। केचित्पक्षयोःप्रकृतिवद्विधानादात्मनोविकारत्वाच्चपुच्छेसप्रादेशंमन्यन्ते। उभयस्मिन्पक्षेप्युक्तप्रकारेणान्यूनेयाइष्ट ४९

वार्योमन्यंते। अत्र पुच्छस्याप्रकृतवत्पक्षे प्रथमद्वितीयकरणानां विकारः इतरयातेषामपि करणान्युच्यंते। चतुर्थीषष्ठ्योः प्रथमकरणं
तथार्धत्रयोदशव्यासं भवति यथाप्रज्ञं भयेत्। तिर्देशावीसंहितेन द्वितीये प्रथमस्य षड्भागमंगुलं तृतीये ---------- सदक्षिणप
क्षे अष्टाचत्वारिंशन्निरश्चीः प्रथमा उदीचीः तयोरन्तरे दक्षिणतः पुच्छे सशिरस्कपक्षोक्तमेव त्रिंशत्। आत्मनि श्रोण्योः स्रक्तिः स्रक्तिः पंच
म्या उदगायता दक्षिणायता स्वतासां भरत्नाव्रतर्धीनो। अर्धेष्टकाः सप्परीतयः। ताः षट्पंचाशत्। तासां उरस्याद्येपंचम्यः श्रोण्यं
सं उभवतस्रक्तः। पंचमीरह्णयाभियात्। द्विशत एष प्रस्तारः। द्वितीयप्रस्तारे चतस्रस्वतस्रो। द्वितीया चतस्र आत्मानमष्टभागावेताः प
क्षेष्टकाभिः प्राचीभिः पक्षौ प्रच्छादयेत्। पक्षौ षट्त्रिंशता षट्त्रिंशता। पुच्छे तु पूर्ववत्। द्वादश सप्तम्यः। त्रयोदशाष्टम्याः श्रोण्यंसे
पृष्ठे द्वे पंचम्यो ग्रीव्यौ। आत्मशेषं चतुर्थीनामष्टेष्टकाः प्राच्यः सप्परीतयः। तृतीयं पंचमरीत्यो मध्ये चतस्रश्चतस्रश्चतुर्थी उभयत्र त्रिंश
तं षष्ठिमेकां पंचमीमुपदध्यात्। तासामेकत्र षोडश षष्टिरिति तत्र चतुर्दश। एकत्र पंचमी। एष द्विशतः प्रस्तारः। सप्रादेशपक्षे पुच्छे
पुरुषव्यासे प्रादेशं पुरुषं प्रतीचीनमायच्छेत्। तस्य दक्षिणतो न्यसुत्तरतश्चेत्याहिना पुच्छं कुर्यात्। एवं हि प्राकृतावेव करणविशे
षः। यथा तिर्यक्तृज्जुत्वेन द्वादशांगुलं भवति। तथा प्रथमं करणं प्रज्ञं भयेत्। तिर्देशाचीत्यादि द्वितीये तृतीयस्यादि षड्भागमष्टभागे
न वर्धितां चतुर्थ्यां दीनि द्विविधानि पुच्छं चतुर्थे त्रयस्त्रिंशदंगुलं विस्तारं तस्य सनिशेषं चतुश्चत्वारिंशदंगुले योर्विंशतितिलाधि
काः पंचममर्धसप्तदशांगुलव्यासं षष्ठस्य पार्श्वं त्रयस्त्रिंशदंगुलकाः। ताः षट्त्रिंशदंगुलयः साष्टमयोः स एव व्यासपार्श्वमान्यावक्षण
याव स्थिते एकोनत्रिंशदंगुले व्यायामः षट्त्रिंशदंगुलयः श्चतुर्दश तिलाश्च। पुच्छाप्यपविशययोरष्टादशांगुले पुच्छे पंचदशांगुले

आत्मनिवक्तुर्थ्याद्ययोविकृताः शुल्बउपधेयाः प्रकृताएवात्मानि उपधानविधिः। सएव द्वितीयश्येनविकृतेः तत्रोक्तकरणान्येव शुल्बीय
कृत्वाचेत्व्यं। यथा एतच्छ्येनचितंविद्धीनेतियावदात्मानंसारूप्यंतद्व्याख्यातं। श्येनचितमितिविहितंयत्प्रकारंयावदात्मानसारूप
मानविहितंश्येनसारूप्येनसर्वंव्याख्यातं। यत्रवक्रपक्षादिगुणेरात्मानेनयच्छ्येनस्यसारूप्यमुक्तंश्येनाग्निः अर्धदशमाश्चरत्न्य
इत्यादिनाचयनप्रकारउक्तः। तेनयुक्तौकंकालजौस्यातामित्यर्थः। त्रिसप्तावोग्निर्भवतीत्यश्वमेधेविज्ञायते। तत्रसर्वाभ्यासोवि
शेषात्। आश्वमेधिकाग्नेः त्रिसप्तविधोसारत्निप्रादेशाभ्यासः। नपुरुषमात्रस्यविशेषाभावात्। अविशेषेणप्राकृताग्निः त्रैगु
ण्यविधानादित्यर्थः। दीर्घचतुरश्राणांसमासेनपक्षपुच्छानांसमासउक्तः। दीर्घचतुरश्राणांसमासइत्युक्तो। एवंदीर्घचतुरश्र
मस्येत। तंत्रिमितोनिर्ह्रासोविहृद्विवेति। यावदित्युक्तेदीर्घचतुरश्राणिसमस्यादितितेनत्रिप्रसप्तावेमोप्रथमविहरसोनसमासउ
क्तः। एकविंशोग्निर्भवतीत्यश्वमेधेविज्ञायतेतत्रपुरुषाभ्यासोनारत्निप्रादेशानां संख्यायोगात्संख्यायोगात्। अश्वमेधेए
कविंशाग्निकृतौपुरुषाणामेवाभ्यासः। नारत्निप्रादेशानां। प्रकृतौसप्तविधोगर्वेतिसप्तदशसंख्यापृथक्त्वनिवेशनी
नानजातीयेषुपुरुषेषुअसंयुक्तः। नारत्न्यादिषुअरत्निप्रादेशाः अरत्निनोरह्णितइत्यादिवाक्येनस्वरूपमात्रेणवि
हितानर्थक्यसंख्यया। अतः। प्रकृतौपुरुषाणामेवसंख्यासंयोगात्। अश्वमेधेपि। एकविंशाग्नौपुरुषाणामेवसंख्यासंयोगो
युक्तइति। अरत्निप्रादेशास्तेनन्यूनाभवेयुः। पुरुषाभ्यासादनंतरंअरत्निनोरह्णितइतिकुर्यादित्यर्थः। एतदुक्तंभवति। त्रिसप्ता राम
वेकविंशतिप्रकारद्वयविधेः त्रिसप्तावएकविंशोग्निः। ब्राह्मणदर्शनात्। द्वादशनास्यां। द्विरुक्तिः प्रश्नसमाप्तिद्योतनार्था॥ २१॥ ॥ पं०
इतिश्रीकरविंदस्वामिकृतौशुल्बटीकायांषष्ठःपटलः॥ ॥समाप्तः॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ५१

50